# vAstusUtropaniShat savyAkhyA commentary

# વાસ્તુસૂત્રોપનિષત્ સવ્યાખ્યા

## Document Information

Text title : Vastusutra Upanishad with Commentary

File name : vAstusUtropaniShat_savyAkhyA.itx

Category : upanishhat, vyAkhyA

Location : doc_upanishhat

Proofread by : K.S. Sheshadri Sharma

Description/comments : Check the text for only the upanishad

Latest update : October 16, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# વાસ્તુસૂત્રોપનિષત્ સવ્યાખ્યા

અથ અથર્વવેદીય વાસ્તુસૂત્રોપનિષદ્ ।

## પ્રથમઃ પ્રપાઠકઃ

ષટ્શિલ્પવિચારઃ

આથર્વણાઙ્ગિરસ (૧) - શિલ્પકાશ્યપો (૨) હોવાચ પિપ્પલાદમહામતિમ્ । ષોડશતાપિનીમધ્યે (૩) વાસ્તુસ્થાપકવિધેયમ્ (૪) । ય એનાં વેદ । આથર્વણીયે હોતોદ્ગાતૃભિઃ શિલ્પશ્રોતૃભિઃ

વાસ્તોષ્પતિર્જ્ઞેય ઇતિ (૫) ॥ ૧॥

સ વિશ્વકર્મા દેવતા । તસ્ય વિદ્યા ષટ્શિલ્પવિચારઃ (૬) ।

કેષાં શિલ્પકારા ઉપપાદયન્તિ કેષાં શિલ્પકર્માદય ઉપજાયન્તે, કતિવિધાનીતિ તાન્ હ સ આઙ્ગિરસાદીન્ નિરીક્ષમાણાન્ ( નિર્યક્ષ્યમાણાન્) પિપ્પલાદો વવ્રે । સ હ કુવિત્સોવલભુજોત્તોલકઃ, (૭) શિલ્પકાશ્યપઃ પ્રણિધાય યથાકામં પૃચ્છામીતિ । કો વાસ્તોષ્પતિર્વિશ્વકર્મા (૮), તસ્મૈ હોવાચ, મન્યે વયં વેદસદસ્યા જ્ઞાપયિષ્યસીતિ (જ્ઞાપયિષ્યામો) ।

પિપ્પલાદો હોવાચ - યે વૈ કે ચાસ્મિંલ્લોકે પ્રયાન્તિ જ્ઞાનમેવ તે સર્વે કામયન્તે ।

ષટ્શિલ્પાઙ્ગપ્રયોગેણ પ્રજનયન્તિ રૂપાણિ (૯) ॥ ૨॥

રૂપં શૈલેન (૧૦) ખાદિરેણ, એવં રૂપજ્ઞાનઞ્ચ લોકે । વેદે રૂપં રૂપં પ્રતિરૂપં ભવતીતિ વિશેષઃ । તજ્જ્ઞાનં દિવ્યજ્ઞાનઞ્ચ ।

યૂપ (૧૧) ઇદં જ્યોતિઃ ॥ ૩॥

સ હિ યૂપઃ ખાદિરેણ શૈલેન વા વૈતાને (૧૨) ઉક્તમ્ । વૃત્તં હિ યૂપમૂર્ધન્યં સ વિશ્વમિતિ યૂપદણ્ડાદૌ । કર્માણિ સમરૂપાણિ સમરેખાયાં સ યૂપસ્તમ્ભો યૂપદણ્ડઃ । તત્ સંયોગેન યૂપો ભવતિ તજ્જ્ઞાનં વિજ્ઞાપયતિ ય એવં વેદ સ હિ વિશ્વકર્મા શિલ્પાધિદૈવતમ્ (૧૩) । ય એવં જાનાતિ સ પુરશ્રેષ્ઠઃ ।

વૃત્તજ્ઞાનં રેખાજ્ઞાનં ચ યો જાનાતિ સ સ્થાપકઃ ॥ ૪॥

ખાદિરદણ્ડહસ્તો દર્ભરજ્જુકરઃ, તદ્ રજ્જુવલયવેષ્ટિતમિદં તસ્ય રૂપં તજ્જ્ઞાનઞ્ચ શિલ્પજ્ઞાનમ્ । તદ્જ્ઞાનાત્ ( તચ્છિલ્પજ્ઞાનાત્) દિવ્યજ્ઞાનં ભવતિ ( પ્રભવતિ), તદ્જ્ઞાનાત્ મોક્ષઃ, સ હિ મધુઃ (૧૪), ય એવં વેદ ।

શિલ્પાત્ પ્રતિમા (૧૫) જાયન્તે ॥ ૫॥

પ્રતિમાયાઃ શ્રદ્ધા સઞ્ચરતિ, શ્રદ્ધાતો નિષ્ઠા, તતશ્ચ જ્ઞાનમ્, તસ્માન્મોક્ષો ભવતીતિ પઞ્ચ વાસ્તુસોપાનાનિ, ય એવં વેદ । આથર્વણીયે સર્વાનુભૂતિરિત્યનુશાસનમ્ । અથ શિલ્પકાશ્યપાથર્વણાઙ્ગિરસકુવિત્સા (૧૬) દયો હોદ્રીથે (૧૭) કુશલા બભૂવુઃ । વાસ્તુષડઙ્ગકથાં યથામતિ બ્રૂહીતિ પ્રોચુઃ પિપ્પલાદમિતિ । તથેતિ સમુપદિદિક્ષુઃ ।

સ પ્રવહણઃ શિલ્પસૂત્રાધ્યાયં સ્થાપકવિદ્યાં ચાવદત્ ॥ ૬॥

સા વિદ્યા શ્રેષ્ઠા, પ્રજાપતેશ્ચાગ્રા । પ્રજાપતેર્નારદઃ, નારદાન્મયઃ, મયાદ્ વૈશ્રવણઃ (૧૮), વૈશ્રવણાત્ પિપ્પલાદઃ । શ્રોષ્યામીતિ । એષામુન્મેષઃ સત્યમ્ ।

હોવાચાઙ્ગિરસસ્ત્વો પૃચ્છામીતિ । પૃચ્છેતિ હોવાચ । કેન પ્રતિમા સમ્ભવતિ । કથં રૂપં રૂપં પ્રતિરૂપાણિ લોકે સમ્ભવન્તિ । નાહં પ્રભો પશ્યામીતિ । સ પ્રાજાપત્યમાર્ગેણ પિપ્પલાદ ઉવાચ । ભવ ત્વં શાન્તહૃદયઃ આઙ્ગિરસ, મર્ત્યે વા ઇદં સદાસીત્ શ્રેષ્ઠયજને ।

અપાં યો અગ્રે પ્રતિમા બભૂવ પ્રભૂઃ સર્વસ્મૈ પૃથિવીવ દેવી ।
પિતા વત્સાનાં પતિરઘ્યાનાં સાહસ્રે પોષે અપિ નઃ કૃણોતુ ॥

ઇતિ મન્ત્રેણ (૧૯) તૃપ્ત્યર્થમુપાસત ઇતિ ભાવઃ ।
યજનોપાસને ચ ।

શરીરમૂર્તિરહિતે મન આવેશ્ય વિશેષેણ
વિકલ્પિદોષયુક્તં ભવતિ ॥ ૭॥

ઇતિ । રૂપાત્ ક્રમેણ (પ્રતિમા), પ્રતિમાયાસ્તત્ત્વબોધો જાયતે । તત્ત્વબોધાદ્ ધારણેતિ । ધારણાયા ગાથા, કથા પ્રસરતિ લોકે । ગાથાયા રૂપાણ્યુત્પાદયન્તિ સ્થાપકાઃ । તસ્મૈ હોવાચ રૂપકલનાર્થં કારુસાધનાર્થં વિશેષઃ ।

વાસ્તુ ષડઙ્ગમિતિ શ્રેષ્ઠમ્ ॥ ૮॥

શૈલં ખિલપઞ્જરં (૨૦) કીલેન પઞ્જરાકૃતિકોષ્ઠકા રેખાવાસઃ (કીર્ત્યાવાસઃ) તદા રૂપાઙ્ગાનિ મર્માણ્યાશ્રયન્તે તચ્છૈલભેદનમ્ । અઙ્ગપ્રયોગઃ; ન્યાસભાવનાસમ્બન્ધપ્રબોધનં ઇતિ । હોવાચ આઙ્ગિરસઃ-

કથં વિકાશેન રૂપવાસ્તુષડઙ્ગં શિલ્પં સંસિદ્ધં ભવતિ । ભગવતસ્તસ્યૈવ મે કામં બ્રૂયાત્ । શ્રુત્વાહ, યેનૈવં મે સ્થાપકવિદ્યા પ્રપાતિની સમાવર્ત્તતે (સમાવર્ત્તને) । સ હિ ષડઙ્ગક્રમમાહ ।

(શૈલમ્)

ષડ્ધા શૈલં જ્ઞેયમ્ ॥ ૯॥

શિલા તદ્દેશે લોકજ્ઞાને ષડ્ધા પ્રથિતા । હિરણ્યરેખિકા, સમવર્ણા, તામ્રા, ધાતુપુટિતા, બજલબ્ધા, સૈકતાલિકેતિ । યદા હિરણ્યરેખા કુટિલા સોઽવલક્ષણઃ । સા પ્રતિમાર્થં હીના વિરૂપં પ્રદદાતિ । તદ્દર્શનેન વિકલ્પભાવો પ્રભવતિ । દર્શનાદેતા અર્થહીના ઉચ્યન્તે, વદન્તિ, ભવન્તીતિ ।
એતદર્થં પ્રતિમાવૈલક્ષણ્યં ભવતિ । યદા પૂર્ણશૈલમેકવર્ણં કૃષ્ણં કૃષ્ણપિઙ્ગલં હારિદ્રં વા મુખ્ય પ્રતિમાર્થં ધ્યેયં સા સમવર્ણા । કઠિનતમગાઢપિઙ્ગલશિલા ન ધ્યેયા ।
યદા શૈલં ભિત્ત્યાકૃતેરપૃથક્ પ્રતિમાશાલાર્થં (૨૧) તદ્ ધ્યેયમ્ । શૈલં પૃથક્ત્વેન હીનં ભવતિ ।
યત્ર કેવલં લીલાવિગ્રહા નિવસન્તિ ભિત્ત્યઙ્ગે, ઇતિ । શિલા ધાતુપુટિતા ધૂમવર્ણા વ્રણોપેતારૂપાર્થં ઘોરેતિ । શૈલાન્તરે સ્તરાભ્યન્તરે કોમલરસબદ્ધા રેખાઃ સન્તિ યાઃ પીતપ્રભાઃ સદાઽધમા ભવન્તિ શ્રેષ્ઠૈઃ શિલ્પકારૈઃ ।
સૈકતાલિકશિલા યૂપયોનિમિથુનસ્તમ્ભ (૨૨) વૃષસ્તમ્ભકુણ્ડાર્થં વિશિષ્ટા, ન રૂપાર્થં ગ્રાહ્યા, તજ્જ્ઞાનલબ્ધસ્થાપકાઃ સમુપતિષ્ઠન્તિ જનલોકે સમ્પન્ના મહીયન્તે ।

શૈલાદઙ્ગરાગજ્ઞાનં પ્રસરતિ ॥ ૧૦॥

સર્વેષુ લોકેષુ કામચારો ભવતિ ।
ઇતિ આથર્વણીયે વાક્કાયમનોમાર્ગેણ પિપ્પલાદકલ્પે વાસ્તુસૂત્રસમ્પ્રદાનમિતિ ચર્ચાક્ષેણ મુનિહોતારોપનિધાનેન શૈલષડઙ્ગજ્ઞાનનામ પ્રથમપ્રપાઠકઃ ।

## દ્વિતીયઃ પ્રપાઠકઃ

ખિલપઞ્જરજ્ઞાનમ્
અથ ખિલપઞ્જરજ્ઞાનં (૨૩) ઘટનમિતિ બ્રૂમઃ । તેન આચેષ્ટો ભવ આઙ્ગિરસ (૨૪) ગ્રાભકાર ઇવ ।

નિર્દિષ્ટાર્થકપ્રતિમા (૨૫) ગ્રાહ્યા ॥ ૧॥

અનુકૂલ (પ્રતિમાનુકૂલ) શિલા અભિજિતિ (૨૬) સમ્પ્રાપ્તે દર્ભેણ પાતયેત્ કારુશાલાયામ્ । તતઃ ઉદુમ્બરકીલેન શિલાં રોધયેત્ ।

પાતનં પ્રથમા ક્રિયા ॥ ૨॥

પાતનાન્તે ઉત્તાડનઞ્ચ, પિચ્છિલકરણાર્થં હોતાઽધ્વર્યુઃ સ્થાપકૈઃ સહ રૂપશિલાં મર્દયેત્ ।

મર્દનં દ્વિતીયા ક્રિયા ॥ ૩॥

આદૌ ૐ-
દધિક્રાવણો અકારિષં જિષ્ણોરશ્વસ્ય વાજિનઃ ।
સુરભિ નો મુખા કરત્પ્ર ણ આયૂંષિ તારિષત્ ॥

(ઇતિ) મન્ત્રેણ (૨૭) તતઃ મહિલુક (૨૮) પયસા શિલાં ક્ષાલયેત્ (મર્દયેત્) , એતત્ સર્વં કુમ્ભીકા (૨૯) મોચનાર્થમ્ (વર્જનાર્થમ્) । તત આપાદશીર્ષં શતકેશિવૃષં (૩૦) ચિન્તયેત્ પ્રાર્થયેચ્ચ ।
ૐ શતકેશાય મહર્ષભાય મે રક્ષ રક્ષ સ્વાહા ઇતિ બ્રૂયાત્ । મહર્ષભ તસ્ય નવ નભસ્તતો વાશ્રા આપપૃથિવી તર્પયતુ ।
એતેન જઙ્ગિડાદયઃ (૩૧) પલાયન્તે । એવં શુભં ભવતિ, મનઃ પ્રમોદં ભવતિ, સોઽમૃતો ભવતીતિ । તતો મણ્ડલકરણં વલયકીલસંયુતયુજુવદણ્ડેન (૩૨) રજ્જુસંયોગેન મણ્ડલૈકં રચયન્-
પુનન્તુ મા દેવજનાઃ પુનન્તુ મનવો ધિયા ।
પુનન્તુ વિશ્વા ભૂતાનિ પવમાનઃ પુનાતુ મા ॥ (૩૩)
ઇત્યનેન મન્ત્રેણ વિલં નિર્ધારયેત્ ।

વિલમિતિ મર્મ જ્ઞેયમ્ ॥ ૪॥

એષા તૃતીયા ક્રિયા (૩૪)। વિલસ્યોભયપાર્શ્વગં પૃથગ્બિન્દુમવલમ્બ્ય મણ્ડલદ્વયં રચયન્તિ સ્થાપકાઃ । તદ્દેશે શિલાક્ષેત્રે રેખાયાં પ્રકૃતિપુરુષન્યાયેન સંલગ્નેન વૃત્તયુગ્મમાચરન્તિ । તદ્ યામલમણ્ડલમિતિ । એકેન, દ્વૌ એકરેખાયામિતિ ધ્યેયમ્ ।
શિલ્પશ્રોતારઃ શ ृણુત, કેનોપાયેન વજ્રેણ (૩૫) રેખાઃ કર્ત્તવ્યાઃ । તતઃ કીર્ત્યાવાસઃ (૩૬) પ્રજાયતે ।

ન કૃત્યરૂપાર્થં (૩૭) રેખાકરણં કર્ત્તવ્યમ્ ॥ ૫॥

આદૌ વૃત્તં વૃત્તમ્ (૩૮) ઇતિ વિશ્વમ્ ॥ ૬॥

તદ્રૂપે પ્રાણઃ, યથા પુરુષસ્ય મનઃ, તદ્વૃત્તં કાલઃ, એષ વાસ્તુવેદે । વૃત્તસ્ય ગતિરવધારિતા , યથા ચિત્તવૃત્તિઃ । વૃત્તસ્યાધારોઽમૃતં બિન્દુસ્તસ્ય સ્થિતિઃ , યથાઽઽત્મા । બિન્દું સમારભ્ય તદ્બિન્દુમિલિતેન પરિભૂ પરિધિઃ સઞ્જાયતે । તદ્ હિ વૃત્તં પરમેષ્ઠી, તદ્ દ્રષ્ટા, તદ્ યોગઃ । તત્ ઋતુઃ, તત્ સત્યમ્ । ય એવં વેદ ।

એકૈકસ્ય સંયોગે એકીભવતિ ઇતિ તસ્ય
ભાવઃ વૃત્તં હિ પૂર્ણમ્ ॥ ૭॥

બિન્દુસ્તસ્યાધારઃ, આહુતિરિવ જગન્મયઃ પ્રાણઃ । સા સ્થિતિઃ, યથા ગાયત્રી વેદપદમ્ । તસ્યૈવ શૈલસ્યોપરિ મણ્ડલમ્, મણ્ડલકરણે વાસ્તુગાયત્રીમ્ (૩૯) અથવા અષ્ટાક્ષરીમન્ત્રં (૪૦) જપેત્ । ઇતિ કૃત્યં વૃત્તમભ્યન્તરે ક્ષેત્રસ્યાધારં મન્યે, યથા સર્વાણિ ભૂતાનિ ભ્રમન્તિ તથા નાનારૂપાણિ જાયન્તે । સ વૈ પ્રાણઃ ક્ષેત્રવિભાજનં પ્રતિમાઙ્ગોપલબ્ધયે, તસ્માત્-

રેખાન્વયે સર્વાઙ્ગાનિ ન્યાસય (આચર) ॥ ૮॥

ઇતિ ભેદનક્રિયા । એવં વજ્રેણ શિલાયાં રેખાઙ્કનકરણં ધ્યેયમ્, ન ભૂમૌ ન વા ઇષ્ટકે (૪૧)। અથાસૌ આઙ્ગિરસો હોવાચ - બ્રાહ્મણં ભગવન્તં પિપ્પલાદં દ્વૌ પ્રશ્નૌ પૃચ્છામિ, તૌ ચેન્મે વક્ષ્યતિ । કા રેખા, કસ્તસ્યા ભાવઃ, કતિ ભેદાઃ, બ્રૂહિ પિપ્પલાદેતિ ।

તાન્ હ સ ઋષિરુવાચ -આઙ્ગિરસ, શિલ્પકાશ્યપ શ઼ૃણુ રેખાવ્યાખ્યાનમ્ । તથા તાસાં ભાવઞ્ચ । રેખા ન્યાસસ્યાધારઃ સા ધારેવ । સા કર્મપ્રતીતેરધિભૂતમધિદૈવતઞ્ચ ।

તેજાંસિ સરલરેખાઃ ॥ ૯॥

તદ્રેખેણ મણ્ડલં ભિન્દન્તિ, યથા કર્ત્તારઃ કર્મણા વિશ્વં પરિભિન્દન્તિ, તેભ્યઃ તદ્રૂપેણ રૂપાર્થં ચાક્ષુષત્વેન (૪૨) દેશકથાનુમતં (૪૩) સર્વાણિ રૂપાઙ્ગાનિ પ્રભવન્તીતિ અઙ્ગસામ્યં પ્રભવતીતિ ।

નાભૌ રૂપકર્મ પ્રારભ્યતે ॥ ૧૦॥

સમતાર્થં સર્વાણ્યઙ્ગાનિ નિર્ણયેત્ । એવં બ્રહ્મવિકલ્પઃ । યથા બ્રહ્મવિદ્યા તથા રૂપપ્રજ્ઞા । તદ્ વિજ્ઞાય કારુજ્ઞા વક્રતઃ રૂપકર્મણિ બ્રહ્મ પ્રતિપાદયન્તિ । રમન્તે યથાપૂર્વપૂર્વપ્રજ્ઞાયામ્ । યથા બ્રહ્મવિદ્યા તથા રેખાન્વયે રૂપાઙ્ગન્યાસો મહીયતે । યજ્જ્ઞાત્વા સ્થાપકાઃ પ્રાજ્ઞા મહીયન્તે । ય એવં વેદ । તજ્જ્ઞાનેન સ્થાપકા રૂપજ્ઞા ભવન્તિ (૪૪)। તે વિદ્વાંસઃ, તે વિજ્ઞાતારઃ કારુકર્મણિ બ્રહ્માનુભૂતિં લભન્તે । યથા વિશ્વસૃષ્ટૌ પઞ્ચમહાભૂતાનિ (૪૫) પ્રજાયન્તે, તથા વૃત્તાધારે શિલ્પકાશ્યપાદયો વાસ્તુહોતારો ભૂત મહાભૂતલક્ષણાનિ કલ્પયન્તિ પ્રજ્ઞાપનેનેતિ ।

પ્રાજાપત્યરીત્યા વૃત્તં હિ તેજસ્તદાઽપામ્ભાસે ચતુરસ્રમ્ ॥ ૧૧॥

ચતુરેખાબદ્ધક્ષેત્રમિતિ । યથા સરિત્કુણ્ડે તથા રૂપક્ષેત્રે ચતુરસ્રં (૪૬) સર્વમાપાદવિશ્વં પ્રાજાપત્યમાર્ગેણ શ્રુતિર્દર્શયતિ (૪૭)। તથા હિ રૂપક્ષેત્રે તદ્રૂપસ્યાધારઃ । ભૂયસ્ત્વાદ્ વાસ્તુશ્રોતાર એનં ગૃહ્ણન્તિ ભૂયો વૃત્તમધ્યે ।

કર્ણદ્વયં મરુદ્ભાવેન આચરન્તિ ॥ ૧૨॥

યથા મરુદપ્સંયોગાત્ ફેનો ભવતિ । પુનઃ ફેનાદ્ બુદ્બુદઃ સમ્ભવતિ, તથા ચતુરસ્રં કર્ણરેખાયુગ્મસંયોગાદ્રૂપક્ષેત્રં સક્રિયં ભવતીતિ । સા મારુતકીલસ્ય ક્રિયાપ્રતીતિઃ ।

ધરેવ કર્ણિકક્ષેત્રમાકર્ષયન્તિ સ્થાપકાઃ ॥ ૧૩॥

તતઃ સ્થાપકા મધ્યમારુહ્ય (૪૮) કર્ણિકક્ષેત્રમાચરન્તિ । મણ્ડલમધ્યે દ્વે મધ્યરેખે લિખન્તિ મધ્યરેખા મધ્યપ્રસ્થરેખા ભવતિ । સમમાનેન તત્રોપલભન્તે ચતુષ્ખણ્ડક્ષેત્રાણિ ચતુર્દ્વીપાં પૃથિવીમિવ, એષા ભૂમિક્ષેત્રસ્ય ભાવના । તત્ર મધ્યે-

લબ્ધબિન્દુઃ રસાયાઃ પ્રાણઃ ॥ ૧૪॥

મર્મ વદન્તિ શિલ્પકારાઃ । તસ્ય ભાવં શ઼ૃણ્વન્તુ સર્વેઽમૃતસ્ય પુત્રાઃ શિષ્યાશ્ચ । અપ્પૃથિવીસંયોગાત્ યથા દ્યૌઃ (૪૯) સમ્ભવતિ યથા શ્રુતૌ ઉક્તં (૫૦) તદાકાશે સવિતા દ્યુરૂપેણ ભ્રમતિ । સ સવિતા વ્યોમચરો, યસ્ય ગતિરખણ્ડા । તથા હિ મારુતસ્ય તિર્યગ્ ગતિઃ । તત્ર ખણ્ડિતરેખાન્ નીત્વા શિલ્પસમ્બન્ધાર્થમાકલ્પ્ય લબ્ધસ્થાપકાઃ શિલ્પસમ્ભારેણ દ્વિધા બહુધા બિન્દૂન્ કલ્પયન્તિ પ્રજનયન્તિ બિન્દૂન્ । તદ્વિજ્ઞાતારો વૃત્તાલયે અધોર્ધ્વે દ્વિધાકરણન્યાયેન વહ્નિવત્ ક્ષેત્રમાચરન્તિ (૫૧) કારુકારાઃ । વૃત્તમધ્યે કદાચિત્ સમ્પ્રતિષ્ઠતિ તત્ ત્રિહુતમ્ (૫૨)।

ત્રિહુતાગ્નિઃ સ્મર્યતેઽપિ ચ લોકે ॥ ૧૫॥

નિમ્નગાસ્ત્રિહુતા આપ ઇતિ ॥ ૧૬॥

તદુભયસ્ય સંયોગાન્ મિથુનભાવો ભવતિ । યે જાનન્તિ તે સમ્પન્ના ભવન્તિ । સ ઉન્મેષભાવઃ । અગ્નિરાપઃ સંયોગાદ્ દિવ્યં (૫૩) ભવતીતિ । તન્મહચ્છન્દો હોતારો જાનન્તિ યજ્ઞે પ્રયોજયન્તિ કુણ્ડે સ્થણ્ડિલે લિખન્તિ, તેન દેવલોકાઃ પિતૃલોકા આહુત્યા તૃપ્યન્તિ (૫૪)। મનુષ્યાણાં તત્ સાયુજ્યં પ્રદદાતિ । એવં બહુધા શ્રૂયતે, સર્વે રૂપકારા બ્રહ્મજ્ઞા વૃત્તાભ્યન્તરેણ ક્ષેત્રમધ્યે સમાન્તરાલષડ્બિન્દુમારુહ્યરેખાઃ રેખાં રોધયન્તિ ।

ષટ્કોણકો હિ આકર્ષણીવિદ્યા (૫૫) વિશેષઃ ॥ ૧૭॥

તન્મિથુનચ્છન્દોયોગેન યાતુધાનાઃ (૫૬) પ્રતિઘાતયન્તિ । માણ્ડવ્યાદયો (૫૭) બહુધા દેવાન્ પૂજયન્તિ । આકર્ષયન્તિ રુદ્રાનાદિત્યાન્ વસૂન્ । સાઽઽકર્ષણી વાસ્તુવેદીયરેખાઙ્ગને શ્રેયસી ભાવવ્યક્તોપાયેતિ ।

યથા રૂપે તથા યૂપેઽનુચ્છેદાન્તા ગ્રાહ્યાઃ ॥ ૧૮॥

યાજ્ઞિકા યૂપે સ્થાપકા રૂપે સમાનાશ્ચરન્તિ (૫૮)।

ખનિત્રપ્રકારો ધ્યેયઃ ॥ ૧૯॥

એતદ્ બ્રહ્મમણ્ડલે ખનિત્રકારાણાં કલાષોડશીન્યાયેન તત્ક્ષેત્રં ષોડશાંશેન છેદયન્તિ (૫૯)। સૌમ્યયૂપસ્ય (૬૦) દણ્ડો યદાઽષ્ટાંશઃ સ યજમાનાય પ્રીતિકામાર્થઃ । કદાચિત્ તત્કલાંશેનાંશાન્ છિન્દન્તિ સોઽપરાવિદ્યાયાં વૃષસ્તમ્ભઃ । અગ્નિસ્તમ્ભો ભવતિ કામ્યાનુસારતઃ શિલાયાં વા ઉદુમ્બરદારવીયઃ । શિલાયૂપો ધ્રુવેતિ શિલ્પકાશ્યપ જ્ઞેયમ્ । યજ્ઞાર્થં સૌમ્યયૂપો, વિષ્ણુયજ્ઞાર્થમષ્ટાંશયૂપઃ, કામ્યકર્માર્થં ષોડશાંશ ઇતિ ધ્યેયમ્ (૬૧)।

સૂત્રાયને (૬૨) રેખાઃ સુભગા ભવન્તિ ॥ ૨૦॥

ભાવં પ્રદદતિ । એતજ્જ્ઞાનં ગુહ્યજ્ઞાનમ્ । એષા ખિલવિદ્યા, રેખાકરણ તત્ ।

ખિલપઞ્જરજ્ઞાનં શ્રેષ્ઠમ્ ॥ ૨૧॥

યે જાનન્તિ તે રૂપજ્ઞાસ્તત્ત્વરૂપાણિ ઘટયન્તિ । રૂપતત્ત્વે વિના રેખાકરણં રૂપં હીનમિતિ ધ્યેયમ્ ।

ઉત્થિતરેખા (૬૩) અગ્નિરૂપાઃ, પાર્શ્વગા (૬૪) અબ્રૂપાઃ,
તિર્યગ્રેખા મરુદ્રૂપા ઇતિ ॥ ૨૨॥

રેખાપ્રભેદે ભાવભેદા ઉપજાયન્તે । રેખાઽનુસૃતં રૂપં વિભાતિ । રૂપં સુરૂપં ભવતીતિ (૬૫)। તત્ત્વરેખાવલમ્બને રૂપાત્મપ્રત્યક્ષં ભવતિ પ્રતિરૂપે ચ । યથાઽઽહુત્યા વૃષ્ટિર્ભવતિ તથા રૂપસૌભગાદ્ ધ્યાનભાવઃ સમ્પ્રતિષ્ઠતે । યથા પર્જન્યાદન્નં સમ્ભવતિ તથા ધ્યાનાલ્લય ઉપજાયતે । લયાન્મનુજા દિવ્યા ભવન્તિ । યથાઽન્નાત્ પ્રાણઃ સઞ્ચરતિ તથા લયાત્તદ્ભાવમનુભવન્તિ, મનો નિશ્ચલં ભવતિ । તેષાં ન પુનરાવૃત્તિઃ, એતદર્થં રૂપં કલ્પયન્તિ ઋષયો લોકે । રૂપે રેખા આહુતય ઇવ ।

રૂપસૌભગાદ્ ધ્યાનભાવો જાયતે ॥ ૨૩॥

સા હિ વૃષ્ટિઃ । સા ઋતસ્ય ધારા યથા પર્જન્યાદ્ બહુધાઽન્નાનિ સમ્ભવન્તિ (૬૬) તથા રેખાયા રૂપાણિ ।

અગ્નિરેખાયામુત્તુઙ્ગરૂપાણિ જાયન્તે ॥ ૨૪॥

તાનિ સર્વાણ્યુદારભાવપ્રદાયકાનિ સૌમ્યોત્થિતાકૃતીનીતિ ।

અબ્રેખાયામુત્સુકરૂપાણિ જાયન્તે ॥ ૨૫॥

તાન્યુગ્રભાવપ્રદાયકાનિ ।

મારુતરેખાયાં તૈજસરૂપાણિ ॥ ૨૬॥

તીક્ષ્ણભાવપ્રદાયકાનિ યોધરૂપાણ્યુપજાયન્તે । તાનિ સર્વાણિ ભીષણરૂપાર્થમ્ । કર્ણજા રેખા ગ્રાહ્યા ઇત્થં રૂપકર્માર્થમ્ ।

રેખાજ્ઞાનં સર્વમિતિ જ્ઞેયમ્ ॥ ૨૭॥

યે જાનન્તિ સર્વં તે સ્થાપકોદ્ગીથરૂપેણ (૬૭) ખ્યાતા ભવન્તિ ।
ઇતિ પૈપ્પલાદીયવાસ્તુસૂત્રે વાક્કાયમનોમાર્ગેણ સમ્પ્રદાનમિતિ ચર્ચાક્ષેણ મુનિશ્રોતૃણામુપનિધાનેન ખિલપઞ્જરાકર્ષણજ્ઞાનમિતિ વાસ્તુસૂત્રસ્ય દ્વિતીયપ્રપાઠકઃ ।

## તૃતીયઃ પ્રપાઠકઃ

શૈલભેદનમ્
શિલ્પવ્યાખ્યાનં આશ‌ૃણુતેદમ્ । વાસ્તુષડઙ્ગમધ્યે એતે શૈલભેદનોપાયાઃ તથેતિ સમુપવિશન્તિ તે । આથર્વણાઙ્ગિરસશિલ્પકાશ્યપ ઉવાચ ભગવન્તં પિપ્પલાદમ્, અસ્માન્ વદન્તુ શિલ્પાચારે ભેદનાર્થં યદ્ યદ્ શ્રેય ઇતિ । યત્ કતિધા અલભ્યમુવાચ ત્વાં પૃચ્છામીતિ, પૃચ્છેતિ હોવાચ । કા શૈલભેદનસ્ય ગતિઃ, કે પ્રયોજયન્તિ । પ્રસ્તાવનાક્રમેણ પ્રસ્તરે ખિલપઞ્જરાર્થં રેખાકરણે કિં વા પ્રયોજનમ્,
પિપ્પલાદો હોવાચઃ-
રેખાનુક્રમેણ રૂપાઙ્ગાન્યાચરન્તિ ।

રૂપસ્ય ભાવો મુખ્યઃ ॥ ૧॥

ભાવાત્ પ્રેરણા (૬૮) પ્રસરતિ, પ્રેરણયા દિવ્યબોધઃ સઞ્જાયતે । તત્ક્રિયા હિ ભેદનવિદ્યા । યથા પરાવિદ્યાયા દિવ્યત્વં જાયતે તથા સુરૂપાદ્ દિવ્યત્વમુપલભન્તે મનુષ્યાઃ । તેષાં મનોવૃત્ત્યાં રૂપસ્ય ભાવજ્ઞાપનાર્થં રૂપકર્માણિ સાવધાનેન સ્થાપકા આચરન્તિ । રૂપમધ્યે કિઞ્ચિત્ સૌમ્યં કિઞ્ચિદુગ્રં ચ ।

ભાવાનુસારતો રેખાવિધાનમિતિ જ્ઞેયમ્ ॥ ૨॥

એતદ્ યો જાનાતિ સ મર્મજ્ઞઃ (૬૯)। સ લોકે માન્યો ભવતિ ગ્રામે વાસ્તૂદ્ગીથરૂપેણ ખ્યાતો ભવતિ । નૃપે ચાક્ર (૭૦) રૂપેણ ।

તેષાં બહુધાકૃત્યં શ્રેયઃ ॥ ૩॥

તે શૈલં છિન્દન્તિ, રૂપાણ્યુત્ખોદયન્તિ । રૂપાઙ્ગાનિ રેખાનુપાતે પાતયન્તિ । અઙ્ગયોર્મધ્યે ક્ષીણકૂટાઙ્ગાનિ ભિન્દન્તિ । કૂટાદ્ યત્ત્યક્તશિલા ઉદ્ધૃત્તાસ્તચ્છિલાઃ નિક્ષિપન્તિ સમન્ત્રેણેતિ ત્યાગઃ । અઙ્ગાન્યુત્થિતકૂટાનિ નીચાનિ, એતન્ન્યાસબોધઃ ।

ન્યાસાર્થં કાલબોધો ધ્યેય ઇતિ ॥ ૪॥

ન રાત્રૌ, ન દર્શે, ન સૂર્યસોમયોઃ સઙ્ગમે, ન સન્ધ્યાયાં વ ઉષાયાં ચરન્તિ શ્રેષ્ઠરૂપકારાઃ । તેઽભિધૃતાર્થમુદુમ્બરદ્વિપક્ષાન્ (૭૧) નિખાય રૂપશિલામવરોધયન્તિ । તદ્ રોધનમ્ । રોધનકાલે પર્જન્યપૂજને જટાવેદં (૭૨) પઠેદિતિ પઠનોપાસનેન રસવિજ્ઞાતન્યાયેન ઋષયઃ શૈલાચાર્યા ભિન્દન્તિ શૈલમ્ ।

તદ્ભેદનેઽભિમન્ત્રયન્તિ ખનિત્રાણિ ॥ ૫॥

ૐ ઉત્તિષ્ઠ પુરુષિ કિં સ્વપિષિ ભયં મે સમુપસ્થિતમ્ ।
યદિ શક્યમશક્યં હૂઁ (દુર્ગે) ભગવતિ શમય સ્વાહા ॥

ઇતિ ખનિત્રપ્રયોગમન્ત્રઃ । મન્ત્રાત્ કાલો વિનશ્યતિ, ભયં વ્યપોહતિ । એતજ્જ્ઞાનેન અગ્નિહોત્રં ચરન્તિ વૈશ્વાનરે જુહ્વતિ । યથાઽઙ્ગારેષુ ભસ્માર્થં જુહુયાત્ પાપાનાં તથા શિલ્પકારા રૂપાર્થમગ્નિહોત્રમાચરન્તિ વૈશ્વાનરે જુહ્વતીતિ । વાસ્તુયજ્ઞાત્ ખનિત્રબાધો વ્યપોહતિ । કુશઙ્કા વિનશ્યન્તિ । ખનિત્રપ્રયોગે દૌર્બલ્યબોધે મન્ત્રં મનસિ ધ્યાયન્તિ ।
મન્ત્રઃ-ૐ ચક્ષુરસિ ચક્ષુર્મે દાઃ સ્વાહા ।
પરિપાણમસિ પરિપાણં મે દાઃ સ્વાહેતિ ॥ (અથર્વવેદ ૨.૧૭.૬ -૭)
એષા ક્રિયા ધ્યેયા, ય એવં વેદ ।
અથાઙ્ગિરસાદય ઉદ્ઘાતારઃ પપ્રચ્છુઃ કશ્ચ સ્ખનિત્રપ્રકાર ઇતિ ।

ખનિત્રપઞ્ચકં શ્રેષ્ઠમ્ ॥ ૬॥

શ ૃણુત, કેનોપાયેન શિલ્પોદ્ઘાતારો ભેદનકર્ત્તનાદ્યાચરન્તિ । ખનિત્રકર્મ ન વૈ રૂપે સોમશાલાયાં સ્થણ્ડિલકરણે હોતારઃ પ્રયોજયન્તિ । યથા બૃહસ્પતેર્ગૃહશાલાપ્રકરણે લોકવાસ્તૂપાખ્યાને પૂર્વં વેદે ઉક્તમ્ (૭૩)। ખનિત્રાપપ્રયોગે રૂપાણ્યપરૂપાણિ ભવન્તિ । કુક્કુટિકા (૭૪) અપરૂપાણિ પૂજયન્તિ ન બ્રાહ્મણાઃ । તત્ ખનિત્રપ્રયોગે શ્રેષ્ઠાન્ તદ્ભેદાન્ વદામિ ।
ભેદાસ્તુ લાઞ્જી, લાઙ્ગલી, ગૃધ્રદન્તી, સૂચીમુખા, વજ્રા ઇતિ । સર્વે આયસા દ્વિવિધા ભવન્તિ ક્ષીણાઃ પ્રશસ્તાશ્ચ । મુષલધરુભે મુષલદણ્ડેન ખનિત્રં ઘાતયન્તિ પ્રયોજયન્તિ શિલાભેદને તત્ । સર્વાસ્ત્રાણિ તીક્ષ્ણાનિ, ગવામ્બુપુટિતાનિ । તતઃ ઇઙ્ગિડલેપિતાનિ ચર્મશાણિતાનિ ચ ।

રૂપપ્રકર્ષાર્થં રૂપાઙ્ગં સ્નિગ્ધમિતિ ॥ ૭॥

સૌમ્યેન છેદયન્તિ યે તે શસ્ત્રિણઃ । શસ્ત્રં દ્વિમુખી ઘૂર્ણિકેતિ (૭૫) , અયોમુખાસ્ત્રાણિ પાલાશશલાકાં વહન્તિ , ઇદં તેષાં રૂપમ્ । અથ, આઙ્ગિરસઃ પપ્રચ્છ ભગવન્તં પિપ્પલાદં, કેન વજ્રમિવ કઠિનશિલાં ખનિત્રેણ ભિન્દન્તિ વાસ્તુકારાઃ । તં હોવાચ વક્તા-

શિલ્પકારાઃ પ્રલેપયન્તિ દ્રાવકરસમ્ ॥ ૮॥

શઙ્ખદ્રાવ-કુષ્ઠરસ-સૈન્ધવખર્પર-ઉકત્સવલ્કલચૂર્ણેન (૭૬) સહિતં શિલાદ્રવણાર્થમેવં રસચતુષ્ટયમ્, અનેન મન્ત્રેણ દશાહમર્દનાન્તે વૈતાને ખનિત્રં પ્રયોજયન્તિ, ખનનમાચરન્તિ ભદ્રેણ (૭૭) સ્થાપકાઃ ।

એષા હેતિવિદ્યા શ્રેષ્ઠા ॥ ૯॥

રક્ષાર્થં પર્ણમણિઃ પરિધેયઃ ॥ ૧૦॥

ખનિત્રકર્મણિ રક્ષાર્થં પાઠામૂલિકાં ધારયન્તીતિ સ કવચઃ । મન્ત્રેણ સહ ધારયન્તિ પર્ણમણિમ્ । અનેન મન્ત્રેણ-
ૐ શં નો દેવી પૃશ્નિપર્ણ્યશં નિઃઋત્યા અકઃ ।
ઉગ્રા હિ કણ્વજમ્ભની તામભક્ષિ સહસ્વતીમ્ । (અથર્વવેદ ૨.૨૫.૧)

ભેદનાદઙ્ગસૌભગં (૭૮) પ્રભવતિ ॥ ૧૧॥

યથા દેહે તથા દૈવાઙ્ગે ગુલ્ફવલયકુક્ષ્યાદયઃ, ઉષ્ણીષમેખલાદયઃ ખોદયન્તિ સૌભગેન, ઉડ્ડુપયન્તિ કુક્ષશિલાઃ, વિસૃજન્તિ તચ્છિલામિતિ ।

રેખાનુપાતેનાઙ્ગાનિ નિધેયાનીતિ શ્રેષ્ઠકૃત્યમ્ ॥ ૧૨॥

એતેન વાસ્તુવેદવિધાનેન રેખાનુપાતેઽઙ્ગન્યાસો વિધેયઃ ।

ગાથાનુપ્રાસે લક્ષણં વ્યક્તં ભવતિ ॥ ૧૩॥

યથા ગાથાયાઃ કથાસ્તથા રૂપલક્ષણાન્યાચરન્તિ રૂપકાર-રૂપજ્ઞાઃ, તથા વ્યક્તરૂપં સમ્ભવતિ । યદ્ રૂપસ્ય હાવભાવાદિ પ્રત્યક્ષં તદ્ વ્યક્તરૂપમ્ । રૂપાદુપાસકા ભાવસિદ્ધિમુપલબ્ધયન્તિ યજ્ઞેન ધ્યાનમિતિ પ્રયોગઃ (૭૯) ।

ધ્યાનપ્રયોગે રૂપસૌષ્ઠવં સ્પષ્ટં ભવતિ ॥ ૧૪॥

તથા હિ ધ્યાનરૂપં કથયન્તિ વાસ્તુકારાઃ ।

યથા પ્રકૃતિસ્તથા રૂપલક્ષણમ્ ॥ ૧૫॥

રૂપસ્ય સ્વભાવાનુક્રમેણ રૂપાણિ ભવન્તિ । તેષાં તત્તદ્ગુણાઃ પ્રભવન્તિ કામચારીણાં હૃદયે ઇતિ । કામો (૮૦) જનાનાં ધ્રુવાવૃત્તિરિતિ ।

અઙ્ગાનિ અર્ધાકલે (૮૧) સુષમં (૮૨) ધ્યેયાનિ ॥ ૧૬॥

અર્ચાયાં શ્રેષ્ઠં પૂર્ણાકલં વર્ત્તુલાઙ્ગં, ન શ્રેષ્ઠમિતિભિત્યે-

હર્સાવધિ ઉભયદિશિ ચોર્ધ્વે ન વર્ધયેત્ ॥ ૧૭॥

ઉષ્ણીષમેખલાદિ અપવૃજિનેન રેખાકારે ઉત્થિતે દર્શયન્, ભેદનકાલે રૂપશિલોપરિ શઙ્ખદ્રાવં સિઞ્ચયન્, અપવેનાત્ સંરક્ષયેદિતિ ક્રમઃ ।

રક્ષાવિધાનેન વિઘ્નઘાતયઃ ॥ ૧૮॥

રક્ષાવિધાનેન વિઘ્ના વિનશ્યન્તિ । ખોદનારમ્ભે "ૐ હોજા હોજા શતકેશિ વૃષ મે સંરક્ષય" ઇતિ બ્રૂયાત્ સ્થાપકઃ । અવિઘ્નેન કરરેખાદિ ગાત્રલક્ષણાનિ દૃષદિ દૈવભાવેન કર્તવ્યમ્ । તદ્ગુણાત્ સિદ્ધિં પ્રાપ્નુવન્તિ કામ્યેન વા, અકામ્યેન સાયુજ્યં પ્રદદાતિ એતદર્થં ભેદનકારુકર્મ શ્રેષ્ઠમ્ ।
રેખાન્વિતમઙ્ગપાતનં ભેદને મુખ્યમ્ ।

રેખાક્રમેણ ભેદનં ચતુર્ધા જ્ઞેયમ્ ॥ ૧૯॥

ન્યાસવિધાનેન તદેકાશ્રયિ, યુગલાશ્રયિ, ખણ્ડાશ્રયિ, સ્પર્શીતેતિ । યદા પૂર્ણરેખાયાં રૂપાઙ્ગં નિપતતિ તદેકાશ્રયિ । યદા રૂપસ્ય પ્રભવાઙ્ગં સમ્મુખાઙ્ગં વા ભિન્નરેખામાશ્રયતિ તદ્ યુગલાશ્રયિ । યદા તત્ પૃથગઙ્ગં ભિન્નરેખાયાં વા મૂલરેખાયાં કેવલમઙ્ગાઙ્ગં નિપતતિ, અધ ઊર્ધ્વે ચ તત્ ખણ્ડાશ્રયિ । યદાઽઙ્ગાંશઃ કેવલં કિઞ્ચિદ્ રેખાચુમ્બિતસ્તત્ સ્પર્શિતા હીનમ્ (૮૩)। નેમ્યવલમ્બિતાઙ્ગં કદા શ્રેષ્ઠં ભવતિ ।

નેમ્યોત્તરે રૂપાઙ્ગં ન વર્ધયેત્ ॥ ૨૦॥

ઇતિ પાતનાનુશાસનમ્ । ભેદનકાલેઽવાગ્ ભવેત્ । ગાથાકથાઃ સતતં સ્મરેત્ । રૂપપ્રારમ્ભે ખનિત્રાણિ પ્રોક્ષયેત્ પ્રોક્ષણમન્ત્રેણ । તત્પ્રભાવેન દોષા અરિષ્ટા વિનશ્યન્તિ ।

ખનિત્રચાલનવિધિર્ધ્યેયવિશેષઃ ॥ ૨૧॥

વામહસ્તે જરઠેન ખનિત્રમવરોધયેત્ । કનિષ્ઠિકાયાં રોધયેત્ ખનિત્રમ્ । ઇતિ કૃત્યમ્ । દક્ષિણકરે કુટુમ્ભકં ધારયેત્ ભેદનાર્થં દૈવલક્ષણાનિ રૂપકર્મણિ વેદયન્તે । ઇતિ ભેદનવિધિવ્યાખ્યાનમ્ ।
વાક્કાયમનોમાર્ગેણ ચર્ચાક્ષેણ મુનિશ્રોતૃણામુપનિધાનેન શૈલભેદનભ્રસ્કક્રમ ઇતિ તૃતીયપ્રપાઠકઃ ।

## ચતુર્થઃ પ્રપાઠકઃ

અઙ્ગપ્રયોગઃ

અથ પિપ્પલાદઃ પ્રહૃષ્ટો હોવાચ - શિલ્પજિજ્ઞાસુત્રય, વાગ્રૂપાણિ ચ તસ્યાઙ્ગજ્ઞાનમાહુઃ । પુરા બ્રહ્મૈકં સત્યમસ્તિ । તજ્જ્ઞાનેન હૃદયાકાશે તદ્ બ્રહ્મૈવ જ્યોતિઃ તસ્ય જ્ઞાનવિજ્ઞાનં વિજ્ઞાય એવં યત્કિઞ્ચ વાચા તદ્રૂપેણ વિજ્ઞાનવાચા પ્રપન્નેનાચરન્તિ । ય એવં વેદ । યત્ર ભાવના શૂન્યા તન્નિર્ગુણ ગુણત્વભાવનયા સગુણં ભવતિ । સગુણાન્ મનઃ સ્થૂલં ભવતિ ।

પ્રતીતાત્ પ્રતીકઃ ॥ ૧॥

પ્રતીત-પ્રતીક-પ્રતિમા-ક્રમેણ ત્રીણિ મુખ્યાનિ । યદા જ્યોતિર્મણ્ડલાનુભાસે બ્રહ્મ ઉપલભ્યતે તત્ પ્રતીતમ્ । યથા વિજ્ઞાનમયપુરુષઃ । યશ્ચક્ષુષા ન પશ્યતિ યેન ચક્ષૂંષિ પશ્યન્તીતિ । યદુપમોપમેયક્રમેણ અનુભવભાવાન્ પ્રદર્શયતિ તત્ પ્રતીકમ્ । "અઙ્ગુષ્ઠમાત્રઃ પુરુષ" ઇત્યાદિ વાક્યેન । યા સપર્યાયામાનન્દં પ્રદદાતિ સા પ્રતિમેતિ ।
અવ્યક્ત-વ્યક્ત-પ્રકટ-ક્રમેણ નિર્ગુણ-સૂક્ષ્મ-સ્થૂલ ભાવેન જનાનાં દૈવભાવાહરણં કુર્વન્તી સા દેવયજનવિદ્યા । શતપથે છાન્દોગ્યે ચોક્તા -એષ ક્રમઃ, એષા દેવયજનવિદ્યા । આત્માનન્દેન યજનોપાયેન ત્રયસ્ત્રિંશદ્ દેવતા તાર્ક્ષ્યો બ્રાહ્મણે ઉક્તમ્ ।
યથા અઙ્ગુષ્ઠમાત્રપુરુષસ્ય ભાવઃ પ્રભવતિ વિકલ્પેન અઙ્ગુષ્ઠમિતિ જ્યોતિર્માત્રમ્ (૮૪)। સ યૂપસ્ય દણ્ડ ઇવ ।

રૂપાદઙ્ગાનિ સઞ્જાયન્તે ॥ ૨॥

તદ્ભાવાદ્રૂપં રૂપં પ્રતિરૂપં જાયતે । યથા પુરુષે । ઇતિ જ્ઞાનં જ્યાયમ્; યત્રાન્યૈર્દ્વિધા ભવતિ તદિતરજ્ઞાનં નિશ્ચિતં ભવતિ । એતદેવ સત્યમ્ । તદિતર ઇતરં જિઘ્રતિ । તદિતર ઇતરં પશ્યતિ । તદિતર ઇતરં શ્રૃણોતિ । તદિતર ઇતરમભિવદતિ । તદિતર ઇતરં મનુતે । તદિતર ઇતરં જાનાતિ । યત્ર ઇતરાભાવં યઃ પશ્યતિ તત્ કેન કં વિજાનીયાદિતિ યાજ્ઞવલ્કેન ઉક્તમ્ । ય એવં વેદ ।

અતો દ્વિધા બ્રહ્મ રૂપવદ્ ભવતિ ॥ ૩॥

સ્થાપકાઃ સપર્યાર્થં શૈલે રૂપાણિ ચરન્તિ (૮૫)।

રૂપાર્થં કોષ્ઠકા મુખ્યાઃ ॥ ૪॥

યથા શુલ્વે તથા ચ શિલ્પે । વિના કોષ્ઠકં રૂપસ્ય ભાવઃ સમ્યઙ્ ન ભવતિ । સપર્યાયાં ક્ષુણ્ણતા જાયત ઇતિ । ઊર્ધ્વગ-પાર્શ્વગ ક્રમેણ ચૂર્ણેન રેખાવિભાજનમિતિ કોષ્ઠવિદ્યા ગ્રાભાર્થમ્ ।

વર્ગીકરણં મુખ્યકૃત્યમ્ ॥ ૫॥

યજ્ઞાર્થમિદં શુલ્વં કારુકર્માર્થં શિલ્પમિતિ જ્ઞેયમ્ । ઇતિ સુલભક્રિયા । એવં વેદે । રજ્જ્વાસ્તાવત્ પ્રસારણે વર્ગીકરણમિતિ તસ્ય ભાવઃ । યાવત્ પ્રમાણં ક્ષેત્રશૈલં, તત્ર રેખા અવિકૃતં પ્રકુર્વન્તિ માનદણ્ડૈઃ શિલ્પકારાઃ । તેન બૃહદ્વર્ગા બહુધા ભવન્તિ ક્ષીણાકૃતૌ । એકઃ દ્વૌ દ્વૌ ચત્વારઃ । ચત્વારો દ્વિગુણિતેન અષ્ટૌ । એવ ક્રમેણ બહુધા કોષ્ઠકા ભવન્તિ ગુણવર્ધનેનેતિ । યથા શુલ્વવિભાજને યુગ્મં અયુગ્મં યજ્ઞમેખલાદીનર્ધપ્રમાણેન ચિકીર્ષાક્રમેણ વર્દ્ધયન્તિ તથા સ્થાપકાઃ ।

કોષ્ઠકાન્તરાલે રૂપસ્યાવયવો ધ્યેયઃ ॥ ૬॥

સ્થાપકાઃ પરિમિતાઙ્ગાવયવાદિ માનન્તિ (મીયન્તે) । અયં તાલનિર્યાસો ચિકીર્ષાક્રમેણ ।

પરિમિતાઙ્ગહારાદ્ ભાવલક્ષણાનિ જાયન્તે ॥ ૭॥

અપરિમિતાઙ્ગાનાં તેષાં ભાવવૈલક્ષણ્યં ભવતિ, ઇતિ દોષઃ । કુણ્ડસ્ય કોષ્ઠકે વ્યતિક્રાન્તે હોતારો મૂકા ભવન્તિ, તથા ચ મૂર્ત્યામ્ ।

કોષ્ઠકે વ્યતિક્રાન્તે રૂપમવદ્યં ભવતિ ॥ ૮॥

સ્થાપકાઃ પૈશાચત્વં લભન્તે । અથ શુલ્વવિદ્યાશિલ્પવિદ્યયોઃ કો ભેદઃ ? કિં તસ્ય સન્ધાનમુપલભન્તે, કિં પાર્થક્યમિતિ વદન્તુ ધર્મપુરુષાઃ પિપ્પલાદાઃ ।

શુલ્વં યજ્ઞસ્ય સાધનં શિલ્પં રૂપસ્ય સાધનમ્ ॥ ૯॥

ઇતિ ભેદઃ । શુલ્વકારા દણ્ડરજ્જુસહિતં કુણ્ડસ્થણ્ડિલ-શાલા-યોનિ-મેખલા યૂપાદિ નિર્ણયન્તિ ।

શિલ્પકારાણાં રૂપશૈલે રૂપશાલાદિ ધ્યેયમ્ ॥ ૧૦॥

ઇતિ તેષાં પાર્થક્યં ન મર્મણિ ભેદો જાયતે ।

યૂપાદ્ રૂપં રૂપાદ્ યૂપ ઇતિ સ્વભાવઃ ॥ ૧૧॥

આહુઃ શ્રોતારઃ કેન રૂપેણ શુલ્વકારાઃ કારુરીત્યા યૂપં નિર્ધારયન્તિ યથા પૂર્વવેદાચારેણ ।

યૂપસ્ય માનં ધ્યેયમ્ ॥ ૧૨॥

શ ृણુત વાસ્તુકારાઃ । યજમાનસ્ય ત્રિમુષ્ટિકમાનેન રેખામાનય । તદ્દૈર્ઘ્યેણ સહ દ્વિહ્રસ્વરેખયા વામગં ત્રિહુતૈકં ચર, ઇતિ ત્રિહુતીકરણમ્ । તત ઊર્ધ્વે વામે ચ સઙ્કીર્ણત્રિહુતં સૃજયન્ લમ્બમાનેન ચતુરસ્રૈકં આચર, ઇતિ વર્ગીકરણમ્ । તદ્ વર્ગદ્વિખણ્ડેન વિભાજિતક્ષીણૈકભાગો યૂપસ્યોત્થાનં જ્ઞેયમ્ ।

ષડ્ભાગસ્ય પ્રયોગો ધ્યેયઃ ॥ ૧૩॥

તત્ર પાર્શ્વક્ષેત્રે ષડુપક્ષેત્રલાભાર્થમિદં વિભાજનમ્ (૮૬) । તદ્ષડ્ભાગેભ્યો નિમ્નૈકભાગ પાર્થિવાઙ્ગં પ્રોત્થનાર્થં ભૂમિર્દેવતા । તદુત્તરાદ્વિભાગોઽધોઽઙ્ગં મેખલાબન્ધનાનન્તરં ન્યાસાર્થં સ મૈથુનકાણ્ડઃ, રુદ્રો દેવતા । તદુત્તરે દ્વૌ ભાગાવુત્તમાઙ્ગં પ્રાણાઽઽવાહનાર્થં પ્રજાપતિર્દેવતા । તદુત્તરૈકભાગસ્તુઙ્ગાઙ્ગન્ધ્વજરોપણાર્થં સવિતા દેવતા । એવં ક્રમેણ -

પુરુષસ્ય રૂપેઽઙ્ગચત્વારોઽષ્ટાઙ્ગક્રમેણોપજાયન્તે ॥ ૧૪॥

પાર્થિવાઙ્ગં, કર્માઙ્ગં, અધોઽઙ્ગં, પ્રજનનાઙ્ગં, ઉત્તમાઙ્ગં, પ્રાણાઙ્ગં, તુઙ્ગાઙ્ગ, જ્યોતિરઙ્ગં, ક્રમેણ પુરુષાકલેઽષ્ટાઙ્ગપુરુષસ્ય રૂપમ્ ।
શિલ્પકાશ્યપધીરાઃ પપ્રચ્છુઃ । પ્રિયધા કિં રૂપસ્ય તાલમ્, કસ્તસ્ય ભાવો લક્ષણઞ્ચ સમ્બન્ધમિતિ । તદવગમાય ઉપજ્ઞાક્રમેણ પિપ્પલાદો વવ્રે ।

પાલાશદણ્ડરજ્જુસંયોગે રેખામાનય ॥ ૧૫॥

શૈલે કોષ્ઠકાનામુત્થિતક્રમેણ રેખામાચરેત્ । પયસા શોણશૈલચૂર્ણસંયોગેન ધીરાઃ કોષ્ઠકાન્ પ્રકુર્વન્તિ । કોષ્ઠમધ્યે પાદાચ્છિરોऽવધિ રૂપમુપલબ્ધવ્યમિતિ ।

નિમ્નાદૂર્ધ્વાવધિ સદા રેખાદીનાચર ॥ ૧૬॥

સા હિ ઉત્થિતક્રિયા । સ રુદ્રપતિઃ પુરુષ એવં વેદે ।

પુરુષસ્તમ્ભ ઇવ સ્તમ્ભો વૈ યજ્ઞસ્ય રૂપમ્ ॥ ૧૭॥

દશયજ્ઞસ્યાધારઃ (૮૭) સ (૮૮) વૃષસ્તમ્ભઃ પિતૃયજ્ઞાર્થમ્, રુદ્રપ્રીતયે । પ્રજાપતિરેવ વાસ્તોષ્પતિઃ સ હિ પ્રાણજાગૃતિરિતિ ।

યથા સ્તમ્ભસ્ય દશાઙ્ગં તથા પુરુષસ્ય
દશયજ્ઞપ્રજ્ઞાશ્ચ ॥ ૧૮॥

નિમ્ને પાદઃ, દર્ભમેખલા રજ્જુન્યાયેન નિર્મિતા । તદુત્તરે દણ્ડવત્ પિપ્પલે ઉદુમ્બરે વા તત્ર મેખલા વલયાકૃતિઃ । તદુત્તરે સ્તમ્ભસ્ય દણ્ડવિલં વિષ્ણુર્દેવતા, તદુત્તરે સ્તમ્ભસ્ય કટિરવિશદશરાવાકૃતિઃ । તત્સમ્મુખે મૃગપાદો યથા પઙ્કે તથા નાભિઃ શ્રુવસ્ય ગર્ભાકૃતિઃ । તદુત્તરે સૌમ્યસ્તમ્ભાકૃતિઃ, અમ્બાલિકા દેવતા । તદુત્તરે ચતુરસ્રકૂટશાલા, આવાસ ઇવ સ્તમ્ભસ્ય હૃદયમ્ । તચ્છાલાયાઃ રુદ્રો દેવતા । શતકેશી શતશીર્ષા વૃષઃ (૮૯) , સ જ્યોતિઃ પ્રણવરૂપસ્તારકઃ, તદુત્તરે સ્તમ્ભસ્ય કણ્ઠઃ સ શરાવાકૃતિઃ । સ્વાહા દેવતા । તદુત્તરે સ્તમ્ભસ્ય મૂર્દ્ધમણ્ડલમ્, સવિતા દેવતા, એવં ક્રમેણ દશયજ્ઞાનુરૂપં દશાઙ્ગસ્તમ્ભં હોતારઃ સમુપદિશન્તિ ।

સ્થાપકાચાર્યા સ્તમ્ભાદ્રૂપં બોધયન્તિ ॥ ૧૯॥

પુરુષસમરીત્યા દશાઙ્ગમેતદુચ્ચૈઃ સમદશકોષ્ઠકે, આચરન્તિ પુરુષાકલં યદેતદ્ વેદે ।

સ્તમ્ભઃ કામચારિણસ્ત્રિધામાનયન્તિ ॥ ૨૦॥

યાજ્ઞિકા યજ્ઞે વિડ્રૂઙ્ગં પ્રોથયન્તિ ઐશાન્યે પિતૃમેધે ।

દૈવયજ્ઞાર્થં યૂપઃ ॥ ૨૧॥

તથા હિ અઙ્ગે શુલ્વકારા મૂર્દ્ધાનં દણ્ડં ચ માનયન્તિ । દણ્ડો ભદ્રો વા, અષ્ટાંશો વિશ્વાંશો વા યથાકામ્ય ઇતિ, પાર્થિવાઃ પશુમેધેન અરિમર્દનં કુર્વન્તિ કૃત્સ્નસિદ્ધિલાભાર્થમાહુતયન્તિ ।

તદા પિતૃમેધાર્થં વૃષસ્તમ્ભં મિથુનસ્તમ્ભં
કામચારા હોમે રોપયન્તિ ॥ ૨૨॥

પ્રશસ્તદણ્ડશિલાયામૂર્ધ્વે શુકરમૈથુનરૂપમ્, એતત્પ્રયોગેણ અરિઃ સ્થાણુર્ભવતિ સ્તમ્ભ ઇવ । પાર્થિવાઃ પશુમેધિનઃ ભોગ્યપ્રયોગમાચરન્તિ । એવં વેદે પ્રયોગે ચ, યત્કિઞ્ચવિજિજ્ઞાસ્યો યૂપઃ તદ્રૂપં કેનૈતત્ પુરુષસ્યોદ્ભવં ભવતિ રૂપે । પિપ્પલાદ હોવાચ આથર્વણાઙ્ગિરસ કેન કોષ્ઠકે પુરુષશ્ચાક્ષુષો ભવતિ ।

તદ્બોધે માનુષા રૂપજ્ઞા ભવન્તિ ॥ ૨૩॥

તં હ વક્ષ્યામીતિ ભગવાન્ પિપ્પલાદઃ સુપ્રસન્નઃ તસ્મૈ સૌમ્યપિપ્પલાદ હોવાચ ।
આહુઃ શિલ્પાચાર્યાસ્તદેતત્સત્યમ્ । યથાઽઽદિત્ય ઉદયન્ પ્રાચ્યા દિશઃ પ્રાણં સઞ્ચારયતિ તથા-

પુરુષસ્ય રૂપાકલે કોષ્ઠકસ્યાધો ભાવરૂપં પ્રસરતિ ॥ ૨૪॥

સા હિ સ્તમ્ભસ્ય દશાઙ્ગોદિતક્રિયા । યથા દશયજ્ઞે દશકર્મણિ કર્મોન્મેષો ભવતિ (૯૦)। યથા હિ પુરુષઃ કર્તા, બોધા, રસયિતા, મન્તા, સ્રષ્ટા, શ્રોતા, દ્રષ્ટા, જ્ઞાતા ચ વિજ્ઞાનાત્મા બ્રહ્મ ભવતિ તથા દશાઙ્ગે મનુષ્યા દશકર્માચરન્તિ । એતદ્ભાવે દશકોષ્ઠકે પુરુષશ્ચાક્ષુષો ભવતિ । પાદઃ, પાદપર્વતઃ, દણ્ડઃ, દણ્ડગુલ્ફઃ, એતાન્યઙ્ગાન્યધોઽઙ્ગાનીતિ । જાનુકટિપર્વતાન્તદ્વયં મધ્યાઙ્ગમિતિ । ઉદરહૃદયદ્વયમુત્તમાઙ્ગમિતિ । કણ્ઠમૂર્ધદ્વયં તુઙ્ગાઙ્ગમિતિ, એવં કલ્પયન્તિ રૂપકારાઃ । ઇતિ પુરુષસ્ય દશાઙ્ગમ્ । પુરુષો દશાઙ્ગુલમિતિ ભાવઃ ।
પૂર્વં વેદેન ઉક્તમ્ । સ હિ બ્રહ્મણો વિકલ્પરૂપેણ પ્રત્યક્ષં ભવતિ (૯૧) ।

દશાઙ્ગયૂપે રૂપે ઇતિ તસ્ય ભાવઃ સમાનઃ ॥ ૨૫॥

એતદર્થં કોષ્ઠકાન્ કલ્પયન્તિ રૂપકારાઃ ।

બ્રહ્મકીલાધારઃ, બ્રહ્મકીલેન (૯૨) સહ ક્ષેત્રં વિભાજય ॥ ૨૬॥

બ્રહ્મકીલમધ્યગરેખયા દ્વૈતાંશે બ્રહ્મકીલેન સહ ક્ષેત્રં વિભાજયન્તિ । યથા ધરાયાં મેરુકીલં, પશૌ પૃષ્ઠાસ્થિ, વૃક્ષે સુષીરં, જીવે જીવાત્મા, તથા રેખા હિ સત્યમ્ । રેખા રૂપસ્ય કારણમ્ । તતો રેખાયાં દશકોષ્ઠકાન્ વિભાજય ઉત્તિષ્ઠક્રમેણ, યેન સમોપક્ષેત્રાણિ લભેરન્ ।
કતિ કતિ ખણ્ડિતાનિ ભવન્તિ । ન્યૂનાતિરિક્તાર્થં કારુજ્ઞા આદ્યત્રિષણ્ણવક્ષેત્રાણિ વિભાજયન્તિ । દ્વૌ દ્વાવિતિ ક્રમેણ દશકોષ્ઠકેષુ ચત્વારઃ ખણ્ડિતાઃ ષડખણ્ડિતાશ્ચ । એવં દશકોષ્ઠકા ભુવનસઙ્ખ્યકા ભવન્તિ । યથા પિણ્ડે બ્રહ્માણ્ડં કલ્પયન્તિ ઋષયઃ । યથાઽથર્વવેદિનાં શ્રાદ્ધે (૯૩) પિતૃયજ્ઞે પિણ્ડાર્થં વજ્રેણ મણ્ડલમાચરન્તિ ।
વૈશ્વદેવે તથા દશકોષ્ઠકાનાચરન્તિ (૯૪)। એવં ક્રમેણ પાદઃ તદુત્તરે પાદપર્વતેઽર્ધાંશઃ તદુત્તરે એકાંશદણ્ડાઃ । તદુત્તરે ગુલ્ફોઽર્ધખણ્ડિતાંશઃ । તદુત્તરે જાનુદ્વ્યર્ધાંશસંયોગઃ । તદુત્તરે કટિરર્ધાંશખણ્ડિતાંશઃ । તદુત્તરે દ્વ્યર્ધસંયોગે સમ્મુખે મૃણાલમૂલાકૃતિર્વિલાકારં નાભિઃ । તદુત્તરે ઉદરમેકાર્ધસંયોગે પીનાઙ્ગમિતિ । તદુત્તરેઽષ્ટાવધિ હૃદયમ્ । તદુત્તરે કણ્ઠઃ અર્ધખણ્ડિતાંશે । તદુત્તર એકાર્ધસંયોગે મૂર્ધેત્યુત્તમાઙ્ગમ્ । ઇદં દશકોષ્ઠકેષુ રૂપં ચાક્ષુષં ભવતિ ।

અઙ્ગાદઙ્ગં સઞ્જાયતે ॥ ૨૭॥

ઇયં હિ રચના । સ હિ ન્યાસઃ । અધ ઊર્ધ્વાવધિ ગચ્છન્તિ દિવ્યતાં ક્રમેણોત્થિતકરપાદાદયઃ પ્રવિધાઙ્ગાનિ ।

રેખાસંયોગે તત્ક્ષેત્રેઽઙ્ગાનિ સૌભગાનિ ભવન્તિ (૯૫) ॥ ૨૮॥

અગ્નિરેખાયામુત્થિતાઙ્ગાનિ । અપ્પાર્શ્વગરેખાયાં સ્થિરાઙ્ગાનિ । મારુતરેખાયાં વેગપ્રદર્શનાઙ્ગાનિ । એતન્નિપાતનેન રૂપાણિ મન આકર્ષયન્તિ । તદુત્તરમ્-

ક્ષેત્રનેમિં રોધયેદિતિ ॥ ૨૯॥

રોધનરેખાચતસૃણાં મધ્યે કોષ્ઠકાનાચરન્તિ સ્થાપકાઃ । એવં ક્રમેણ શિલ્પકાશ્યપાઃ રૂપાર્થં ખિલપઞ્જરં ધ્યેયમિતિ વ્યાખ્યાનં વાસ્તૂદ્રીથત્રય પ્રબોધનાર્થં ભગવાન્ પિપ્પલાદો વવ્રે ।
ઇતિ વાક્કાયમનોમાર્ગેણ પિપ્પલાદીયવાસ્તુસૂત્રે સમ્પ્રદાનચર્ચાક્ષેણ મુનિશ્રોતારમુપનિધાનેન અઙ્ગોત્તિષ્ઠાદિમાનબોધનમિતિ ચતુર્થપ્રપાઠકઃ ।

## પઞ્ચમઃ પ્રપાઠકઃ

રૂપભાવનાબોધઃ
અથ હૈનમાથર્વણાઙ્ગિરસશિલ્પકાશ્યપઃ પપ્રચ્છ યદિ યજ્ઞાર્થં શુલ્વં (૯૬) શિલ્પાર્થં શિલ્પસૂત્રઞ્ચ રૂપકર્મણિ, ઇત્થં તદિદં બ્રૂહીતિ । પિપ્પલાદો હોવાચ । શિલ્પમધીયાનાઃ શિલ્પોદ્ધાતારઃ, શૃણુત ।

ભાવસ્યારોપણં રૂપકર્મણિ વિધેયમ્ ॥ ૧॥

યજ્ઞશાલાસ્થણ્ડિલાર્થં શુલ્વજ્ઞાનં શ્રેષ્ઠમ્ । તત્ર શ્રોણિ (૯૭) સાધનમંશાદિપાતનમિષ્ટકાન્યાસપ્રયોગો ભવતીતિ ધ્યેયમ્ । યેન રૂપેણ યથા રૂપકર્મણિ ત્રિકોણિસાધનં કર્ણાકર્ષણં કર્ણિકાકરણં લબ્ધક્ષેત્રે મુખ્યમ્ । એતદર્થં ભાવવોધનસ્ય પ્રયોજનં ભવતિ । શૃણુ, તસ્ય કો ભાવઃ, કસ્તેષાં રૂપસ્ય સન્ધાઃ । દેહઃ કર્માધાર ઇતિ વદન્તિ યાજ્ઞિકાઃ ।

કર્મ ભાવસ્ય પ્રદાયકમ્ ॥ ૨॥

ભાવં પ્રદદાતીતિ ।

ભાવસ્યાઽઽધારો રસઃ ॥ ૩॥

સ રસઃ કર્મણશ્ચોદનેતિ દેહે પ્રસ્કન્દયતિ વાઙ્મનશ્ચક્ષુઃ શ્રોત્રકરપાદાદીનાં ઉદયક્રમેણ, દેહલક્ષણં ભવતિ । ભાવવિધાનેન દેહસ્ય રસાઃ પ્રસરન્તિ ।
રસાત્-

મનસિ વૃત્તિર્બહુધા પ્રજાયતે ।

તદા ભિન્નભિન્નરસાદ્રૂપં નૈકં ભવતિ ॥ ૪॥

નવધા રસઃ ॥ ૫॥

નવધા રસાર્થં રેખાપાર્થક્યં જાયતે ।

પ્રથમરસઃ શૃઙ્ગારઃ ॥ ૬॥

યથા મોહાત્ પુરુષસ્ય નારીં પ્રતિ મૈથુનેચ્છા પ્રભવતિ તદ્ જીવમાત્રસ્ય સત્યમ્ । યત્ર મુદભાવો વિભાતિ સા શૃઙ્ગારમૂર્તિઃ ભવતિ । તથા દ્વૌ તનૂ દેવદેવ્યોશ્ચ ક્રીડાઙ્ગગઠનમ્ । યુગલશરીરે ક્રીડોપાયેતિ, અક્ષક્રીડાદિ મુદિતવિગ્રહાર્થમ્ ।

શૃઙ્ગારરૂપાર્થમભ્રેખા ગ્રાહ્યાઃ ॥ ૭॥

પ્રસન્નાનનમિતિ તેષાં લક્ષણમ્ । કામનિવૃત્તૌ મન ઉલ્લસિતં ભવતિ । હાસ્યં પ્રદદાતિ ।

સ હાસો દ્વિતીયરસઃ ॥ ૮॥

હાસ્યભાવપ્રદાયકવિગ્રહા જનાનાં હૃદયે સુખં સઞ્ચારયન્તિ । કારુપ્રયોગે તેષામધર ઉન્મુક્તઃ, નેત્રં સૌમ્યમિતિ તેષાં લક્ષણમ્ ।

મુખલક્ષણાદ્ રસં જાનન્તિ સર્વે ઈક્ષણેન ॥ ૯॥

મનુષ્યઃ મનોસુખાર્થમુપાસતે । જનાનાં જલે ચ રૂપે ઉભય સમાનઃ । યદા દુઃખં તદા સુખમિતિ સત્યં, રાત્રિન્દિવમિવ । સુખસ્ય પરિણામો વિષાદઃ, વિષાદાત્ સર્વેન્દ્રિયાણિ શિથિલાનિ ભવન્તિ ।

સ તૃતીયઃ કરુણરસ ભાવ ઇતિ ॥ ૧૦॥

નયનમર્ધમુક્તં ચેતિ તેષાં લક્ષણમ્ । કરુણાન્ મનો નિશ્ચેષ્ટં ભવતિ । સોઽવસાદ ઇતિ । અવસાદાત્ પુનઃ વિષાદઃ સઞ્જાયતે । તતઃ ક્રોધો જાયતે ।

રૌદ્રઃ ચતુર્થો રસઃ ॥ ૧૧॥

સ રૌદ્રભાવઃ રૂપે ઉગ્ર વદન્તિ શિલ્પકારાઃ । મુખં પ્રશસ્તં નેત્રાણિ સ્ફારિતાનિ, હસ્તે યોધાયુધમિતિ તેષાં લક્ષણમ્ ।

તિર્યગ્ રેખાયાં રૂપાઙ્ગભાવઃ પ્રકટો ભવતિ ॥ ૧૨॥

ઇતિ વિશેષઃ । રૌદ્રભાવાત્ તનુષિ વિકારો જાયતે ।

સ વીરભાવઃ પઞ્ચમઃ ॥ ૧૩॥

તેષ્વસમાનિ કાયમુખનેત્રાણીતિ લક્ષણમ્ । કૌણપલક્ષણાન્વિતા દ્રુતા પાદરેખા સમસરલા દેવરાક્ષસયોર્મધ્યે ઘાતકર્મેવ । તેષાં મુખે વૈરભાવસ્તલ્લક્ષણં ભવતિ ભયઙ્કરતૂર્યયાણ ઇવ ।

વૈરભાવે ઉત્કટે ભયઙ્કરો (૯૮) ભવતિ ।

સ વૈલક્ષણઃ ષષ્ઠરસઃ ॥ ૧૪॥

ઉભયપાર્શ્વે રૂપસ્યાઙ્ગવૈષમ્યં ધ્યેયમ્ । યે વર્ધિતાસ્તે બીભત્સા ગ્લાનિયુક્તાઃ ।

કુરૂપાઃ ક્ષિપ્તાઙ્ગાઃ મારુતરેખાયામિતિ સ સપ્તમઃ ॥ ૧૫॥

કામે નિવૃત્તે દૈવભાવ ઉપજાયત ઇતિ શેષોપાયઃ । અવગત્યા વિરતો ભવતીતિ ।

શાન્તભાવઃ, સોઽષ્ટમો રસઃ ॥ ૧૬॥

એવં જીવસ્યાષ્ટવિકારરૂપેણાષ્ટભાવાઃ સમ્પદ્યન્તે (૯૯)।

ભાવાનુગતરૂપાણિ ચતુર્ધા મુખ્યાનિ ॥ ૧૭॥

યેષાં શાન્તાસ્તે સર્વેઽગ્નિરેખાશ્રયિણઃ । યેષાં કરુણાસ્તે સર્વેઽબ્રેખાશ્રયિણઃ । આલસ્યમૂર્તિષુ સર્વેઽબાશ્રયિણઃ । યેષાં સર્વાઙ્ગાનિ કર્ણરેખાશ્રયાણિ તે રૌદ્રાઃ । રૌદ્રા મિશ્રા વૈરા મારુતરેખાયા આધારઃ । ઇહાનુશાસનં ધ્યેયમ્ । અથ શિલ્પકાશ્યપો હોવાચ । કિમર્થં ભાવપ્રબોધનાર્થં રૂપાણિ ? કસ્તસ્ય હેતુઃ ? ભેદાદ્ દૈવજ્ઞાનમુપજાયતેઽન્યચ્ચ-ભગવન્તઃ સત્યદ્રષ્ટારો ભાવબોધાર્થં બ્રુવન્તુ ।
પિપ્પલાદો હોવાચ

લોકે ભાવબોધસ્ય હેતુર્મનઃ ॥ ૧૮॥

તદ્ભેદે ભેદ ઉપજાયતે દેવયોન્યઃ, પિતરઃ, સોમઃ, આશાપાલાઃ, વિશ્વેદેવાઃ, રાક્ષસાઃ, હિ (ઽ઼ૅ) ઙ્ગાદયઃ । સર્વસ્ય વૃત્તિરસ્તિ । સર્વે પૃથક્ કતિ મિત્રાણિ કત્યરયઃ । અરિભાવસ્તેષાં સન્ધાઃ । હોતારો દેવાન્ યજન્તિ । પિશાચમોક્ષણાર્થં તર્દાદિ (૧૦૦) વિમોચનાર્થં યજ્ઞમાચરન્તિ । એષા જૈવસન્ધા । યજ્ઞાત્ પિશાચા વિનશ્યન્તિ । અરિસાધનાર્થં બ્રાહ્મણાઃ પર્ણમણિં ધારયન્તિ કવચે । બ્રાહ્મણા યજ્ઞબલેન, ક્ષત્રિયા આયુધબલેન, વૈશ્યા ભૂમિરસજ્ઞાનેન, શૂદ્રાઃ પરિચર્યયા દીપ્તા ભવન્તીતિ વર્ણભેદે ક્રિયાઃ । મોક્ષાર્થં યથા બ્રાહ્મણા યજ્ઞમાચરન્તિ તથા ત્રયો વર્ણા રૂપસપર્યાયાં મોક્ષં લભન્તે । ભાવાન્મુક્તા ભવન્તિ । એવમારોપણે રૂપં ધ્યેયમ્ । એતદર્થં રૂપધ્યાનેન બાધઃ ।

મનુષ્યાણાં વૃત્તિર્મુખ્યેતિ ॥ ૧૯॥

વૃત્તેર્નિષ્કલ-સકલ-ભાવા ઉપજાયન્ત ઇતિ માર્ગઃ ક્રિયાયાઃ પરિણામ ઇતિ । તદર્થં શિલ્પજ્ઞાનાદ્રૂપં ધ્યાયન્તિ, સ્થાપકા બ્રાહ્મણા ભવન્તિ ।

સઙ્કલ્પાદ્ વિકલ્પઃ ॥ ૨૦॥

ઇતિ વિશેષઃ । યથા સઙ્કલ્પાદ્ વિકલ્પઃ તથા ભોગેચ્છાન્તે અરિમર્દનેચ્છોપજાયતે । મર્દનાન્તો ભોગઃ । એતદિન્દ્રિયચક્રમ્ । વિકલ્પભાવાત્ શ્રદ્ધા, શ્રદ્ધાયાઃ સત્તાભાવઃ, સત્તાભાવાદ્ ભાવયજનં પ્રસરતિ । તદ્ભાવેન રૂપં રૂપં પ્રતિરૂપાણિ જાયન્તે ।

એષ ભુવનકોષો દેહાનુભૂત્યાઃ ક્રમઃ ॥ ૨૧॥

શ ૃણુ તત્ક્રમં શિલ્પશ્રોતારઃ । તતઃ શ્રોતારઃ પપ્રચ્છુઃ- ભગવન્ કો ભુવનકોષઃ? કિં તત્સ્વરૂપમ્? કસ્તસ્ય ક્રમભેદઃ? વદતુ ધર્મપુરુષપિપ્પલાદમહામતિઃ શિલ્પકાશ્યપાઃ પૃછન્તીતિ । દેહભુવનકોષસ્ય લક્ષણં દેહાનુભૂતિમિતિ ।

અથ ભગવાન્ પિપ્પલાદઃ પ્રવચનેન વવ્રે । શિલ્પકારાઃ સર્વકર્મણિ શતકેશિવૃષં પ્રાર્થયન્તે-
ૐ રુદ્રશતકેશાય રુદ્ર એતદ્ નાશય ભયં
રુદ્ર શતશીર્ષ શમય ભયં
વૃષરૂપાય શતકેશાય ચ ધર્મરૂપાય તે નમઃ ।
ઇતિ બ્રુવાણાન્તરં પિપ્પલાદ ઉવાચ । શૃણુત, ભુવનાઃ(૧૦૧) તરણસ્ય સન્ધાઃ । હોતારો વૈશ્વાનરે પ્રજાપત્યાદિદેવાન્ યયા વાચાઽઽજુહ્વતિ સ મન્ત્રઃ (૧૦૨)। સ ધ્વનિઃ, ધ્વનેર્બ્રાહ્મણાઽઽત્મજ્ઞા ભવન્તિ, તે ધ્વનેર્દૈવલક્ષણાનિ કલ્પયન્તિ,ઋષીણાં તલ્લક્ષણમ્ (૧૦૩), તલ્લક્ષણં હિ ઋતમ્, તલ્લક્ષણાદ્રૂપં વૃણુતે મનુષ્યલોકે ।
યજ્ઞાદ્ ધ્વનિઃ, ધ્વનેર્લક્ષણં, લક્ષણાદ્રૂપં, રૂપાદ્ ભાવઃ, ભાવાદ્ ગુણઃ, ગુણાત્ ક્રિયા, ક્રિયાયા આચારઃ, આચારાદુપાયઃ, ઉપાયાચ્ચેષ્ટા, ચેષ્ટાયા માર્ગઃ, માર્ગાદ્રૂપાણિ, રૂપાત્ પ્રતિરૂપાણિ (૧૦૪), રૂપવિદ્યાબોધાદ્ રૂપક્રિયા, એષ સપર્યાક્રમઃ વેદસ્યાયને ભુવનકોષઃ ।

અરૂપાદ્રૂપં તસ્ય ફલમ્ ॥ ૨૨॥

આદિત્યો હ વૈ બ્રહ્મ, તદર્થં યજ્ઞઃ, દિશઃ પૃથિવ્યાઃ સમ્બન્ધ ઇતિ મૂલમ્, આદિત્યો હ વૈ બ્રહ્મેતિ તસ્ય ધ્વનિઃ । ધ્વનેર્લક્ષણં સૂર્યસ્ય રશ્મેર્યા યત્ર દેવતા પતિરેક આસીત્ । તલ્લક્ષણમ્ । રશ્મિભિર્દ્વિજા યજન્ત્યમૃતરથેનેતિ તસ્ય રૂપમ્ । સૂર્યો જ્યોતિષ્પતિરિતિ ભાવઃ, ભાવાદ્ ગુણ ઇતિ, સ સૂર્યસ્તપતિ વિશ્વમિતિ તસ્ય ગુણઃ, તદ્ગુણાનુસૃતૌ બ્રાહ્મણા ગાયત્રીં જપન્તિ, યે ચ ઇમે ભૂમ્યામધિયજન્તિ દિવં પ્રયાન્તીતિ તત્ક્રિયાઃ, તારકામુપેત્ય ત ઉત્તિષ્ઠન્તે બ્રાહ્મણા ઇત્યાચારઃ, ત્રિકાલેન કાલસન્ધ્યાં પ્રયોજયન્તિ મન્ત્રૈઃ, પ્રજાયાઃ સંરક્ષણે બ્રાહ્મણા દ્રવિણં દધતિ, સ ઉપાયઃ । મન્ત્રસઙ્ખ્યાસહિતં પ્રયોજયન્તિ ક્રિયાઃ, સા ચેષ્ટા, સા બહુધા શ્રૂયત ઇતિ માર્ગઃ । એવં બહુમત્યા દૈવત્વે રૂપં, રૂપેણાનેકત્વં જાયતે ।
તદ્રૂપં પ્રતિરૂપમિતિ, તજ્જ્ઞાનં રૂપવિદ્યા, તચ્છિલ્પસૂત્રમિતિ । વેદસ્યાયને રૂપભુવનકોષ ઇતિ, એતદર્થં રૂપાર્થં દિશઃ । અરૂપાદ્રૂપં તસ્ય ફલમિતિ પૂર્વં વેદેનોક્તમ્ (૧૦૫)।

દિશાનુસૃતેર્દિશાપાલાનુપાસન્તે (૧૦૬) ॥ ૨૩॥

પ્રાચ્યામાદિત્યઃ, દક્ષિણે યમઃ, પ્રતીચ્યાં વરુણઃ, ઉદીચ્યાં સોમઃ ધ્રુવાયામગ્નિઃ એવમહલ્લિકાઃ (૧૦૭) વદન્તિ, એવં પૂર્વં વેદેનોક્તમ્, તદા દશપ્રચેતસઃ (૧૦૮) આદિત્યા આશાપાલાઃ (૧૦૯) સન્તિ, ય એવં વેદ ।

એવં દૈવભેદાન્માર્ગભેદા જાયન્તે ॥ ૨૪॥

માર્ગાદ્રૂપઞ્ચ, અપ્રાકૃતં નાનૃતં ચ । વિષ્ણુદૈવતાદ્ વૈષ્ણવાઃ (૧૧૦), રુદ્રાદ્ રૌદ્રાઃ, ઇડાયા ઐડાઃ, અમ્બાયા અમ્બિનઃ, સવિતુઃ સૌરા ભવન્તીતિ ।
એતેન ભેદેન બ્રાહ્મણાઃ પ્રતિરૂપાણિ યજન્તિ, ય એતજ્જાનાતિ સ રૂપજ્ઞઃ (૧૧૧), યે રૂપશૈલે રૂપમાચરન્તિ તે રૂપકારાઃ, તે રૂપબોધે રૂપાણ્યાચરન્તિ । તદ્રૂપાર્થં કામચારા યજ્ઞં કુર્વન્તિ (૧૧૨) કામનયા ય એવં વેદ ।

ઇતિ વાક્કાયમનોમાર્ગેણ પિપ્પલાદકલ્પે સમ્પ્રદાનં ચર્ચાક્ષેણ મુનિશ્રોતૃણામુપનિધાનેન રૂપભાવનાબોધાધ્યાય ઇતિ પઞ્ચમપ્રપાઠકઃ ॥

## ષષ્ઠઃ પ્રપાઠકઃ

સમ્બન્ધપ્રબોધનં

અથાથર્વણાઙ્ગિરસશિલ્પકાશ્યપાદય ઉપેત્ય પિપ્પલાદમાશ્રમે પપ્રચ્છુઃ, ભગવન્તઃ કુતો હ વા રૂપે ભેદઃ સઞ્જાયત ઇતિ શ્રોષ્યામઃ શ્રેયઃ । તાન્ હ સ પિપ્પલાદો હોવાચ, ઇયં-

ન્યાસધારણા શ્રેષ્ઠા ॥ ૧॥

સા ધારણા સૃષ્ટિઃ । સૌમ્યપિપ્પલાદઃ સુપ્રસન્ન ઇદં વવ્રે, યથા પ્રજાકામો વૈ પ્રજાપતિઃ સ તપોઽતપ્યત, સ તપસ્તપ્ત્વા મિથુનમુદપાદયત્, રયિઞ્ચ પ્રાણઞ્ચેતિ, એતૌ મે બહુધા પ્રજાઃ કરિષ્યત ઇતિ પૂર્વે પ્રશ્ને મયોક્તમ્ । તથા કામચારિણઃ સુખં કામયન્તે । સુખમસીમં તત્ સુખચક્રે -

વૃત્ત્યા દૈવચિન્તને ભેદઃ સઞ્જાયતે ॥ ૨॥

સ હિ દ્વિધા, તદ્ભેદાત્ પ્રતિરૂપાણિ કલ્પયન્તીતિ વાદઃ । અથ હૈનમાથર્વણાઙ્ગિરસાદયસ્ત્રયઃ શ્રોતારઃ પપ્રચ્છુઃ, ભગવન્તઃ રૂપાકલે કેનોપાયેન બ્રાહ્મણા દૈવેઽન્યસન્ધામારોપયન્તિ । કથં ન્યસન્તિ । તતઃ ષોડશકલપિપ્પલાદપુરુષો હોવાચ શ઼ૃણુતામૃતસ્ય પુત્રાઃ ।

લક્ષણપ્રકાશાર્થં શિલ્પવિદ્યા ॥ ૩॥

શિલ્પોદ્ગીથાઃ પુરોહિતા ક્રમેણ બહુધા ન્યાસમાચરન્તિ । સ્થાપકાસ્તથા ચ ।

ન્યાસોઽલઙ્કારમુદ્રાઽઽયુધબાધ્રકક્ષ

વાહનોપદેવારિસ્તુવક ક્રમેણ રૂપનવાઙ્ગમિતિ ધ્યેયમ્ ॥ ૪॥

સ રેખાન્યાસઃ, અલઙ્કરણમ્, મુદ્રા, બાધ્રઃ, કક્ષઃ, વાહનમ્, ઉપદૈવતમ્, અરિણઃ, સ્તુવકા (ઇત્યેવં) કલ્પયન્તિ ।
આશ઼ૃણુત વત્સાસ્ત્રયઃ, ન્યાસનવાઙ્ગાનુશાસનમિતિ પિપ્પલાદો વવ્રે ।
રેખાં રૂપાઙ્ગસૌષ્ઠવપ્રાપ્ત્યર્થં શૈલે લિખન્તિ પ્રાજ્ઞસ્થાપકા । ઇતિ નવાઙ્ગં ન માનુષે, દૈવક્ષેત્રે મુખ્યમ્ ।
ઉષ્ણીષમસ્તકાઃ કારુકારાઃ શૈલક્ષેત્રે દૈવભાવે રેખાઃ વજ્રચૂર્ણેન લિખન્તિ ।

તિસ્રઃ રેખાઃ શ્રેષ્ઠાઃ ॥ ૫॥

ઊર્ધ્વરેખા અગ્નિરેખાઃ યથા શિખા ઉત્થિતા પ્રજ્વલતિ । પાર્શ્વગા રેખા અપછેદા યથા નદીનાં પ્રવાહઃ । કર્ણક્ષેત્રગા ભેનકારેખા મારુતચ્છેદા મારુતસ્ય તિર્યગ્ગતિરિવ, ઉદાહૃતરેખયા શૈલક્ષેત્રે પઞ્જરાખ્યં કોષ્ઠકકર્માઽઽચરેત્ । એષ કોષ્ઠકઃ અગ્ન્યમ્મરુતરેખાસમષ્ટ્યા સંયોગેન સમ્ભવતિ ।

રૂપક્ષેત્રે કોષ્ઠકાલિર્મુખ્યા ॥ ૬॥

શૈલગુહાયાં ભિત્તૌ સૂક્ષ્મકોષ્ઠકરચને આકલાન્યુપલભ્યન્તે સુખેન । યથા ષોડશકલો (૧૧૩) વૈ પુરુષઃ ષોડશાંશૈઃ પૂર્ણો ભવતિ તથા -

ષોડશકોષ્ઠકમધ્યે રૂપાણિ પ્રભવન્તિ

તદ્રૂપાર્થં શ્રેષ્ઠમ્ ॥ ૭॥

વજ્રચૂર્ણેન સહ તત્ક્ષેત્રે શલઘૂર્ણિકયા વૃત્તમેકં રચય મર્મલાભાર્થમ્ । સ નેમિઃ બ્રહ્માભાસ ઇતિ । રૂપે તદ્ વિલં પ્રાણવિલમ્ ।

વિલમિતિ મર્મ, બ્રહ્મેવ ધ્યેયમ્ ॥ ૮॥

તન્મર્મણાઽઙ્ગભાવઃ પ્રસરતિ ।

ષોડશકોષ્ઠકપ્રમાણવિભાગસ્તુ

બ્રાહ્મદૈવજૈવોપદૈવયાજકક્રમેણ પઞ્ચધા ધ્યેયઃ ॥ ૯॥

કોણચતુષ્ટયાવલમ્બનેન નેમ્યા સહ કોણવર્ગં કર્તય । કર્તિતકોષ્ઠકે, ઊર્ધ્વદેશસ્ય ક્ષેત્રદ્વયે યક્ષગન્ધર્વાનપ્સરસાદીન્ ખોદય । અધઃસ્થં તદનુપાતય । ક્ષેત્રદ્વયં સ્તુવકક્ષેત્રમ્ । ઉભયકોણે માનવોપાસકં રચય । અધોમધ્યસ્થલેકોષ્ઠકૌ દ્વૌ જીવક્ષેત્રં દૈવવાહનાર્થમ્ । મધ્યસ્થાશ્ચત્વારઃ કોષ્ઠકાઃ બ્રહ્મક્ષેત્રમ્ । તત્રાર્ચારૂપસ્યાઙ્ગનિર્ણયઃ । અધોર્ધ્વાવધિ તુઙ્ગાઙ્ગપર્યન્તમાપાદશીર્ષમાચર । બ્રહ્મક્ષેત્રસ્ય વામદક્ષિણસ્થં ક્ષેત્રચતુષ્ટયં જાયાક્ષેત્રમ્ ।

રૂપાઙ્ગં ચતુર્ધેતિ વિશેષઃ ॥ ૧૦॥

પાર્થિવાઙ્ગ, જૈવાઙ્ગં પ્રાણાઙ્ગં દેવતાઙ્ગમિતિ । પાદાન્તાદ્ ગુલ્ફપર્યન્તં પાર્થિવાઙ્ગં (૧૧૪), ગુલ્ફાન્નાભિપર્યન્તં જૈવાઙ્ગમ્ (૧૧૫) , નાભેઃ કણ્ઠાવધિ પ્રાણાઙ્ગમ્ (૧૧૬) , કણ્ઠાદ્ બ્રહ્મરન્ધ્રપર્યન્તં દ્યોતાઙ્ગમ્ (૧૧૭)। તન્મૂર્તિતારકમમૂર્તિતારકમિવ (૧૧૮)। યથાપૂર્વં વેદેનોક્તમ્ ।
ઊર્ધ્વયુગભાગયોઃ રૂપસ્યાનનાલઙ્કારૈઃ સહ દૈવતેજોમણ્ડલમ્ । અણ્ડાકારં પિણ્ડાકારં વા સ્યાત્ । તત્ર શુક્લજ્યોતી રસામૃતં (૧૧૯) વિધતે । એવં રૂપેઽઙ્ગભેદાશ્ચત્વારઃ શિલાદેવતાર્થમ્ । વામે દક્ષિણે ક્ષેત્રદ્વયે દિવ્યક્ષેત્રે દેવશક્તિભિરુપદૈવતાનિ તિષ્ઠન્તીતિ, ઉભયદિશિ કોષ્ઠકાશ્ચત્વારઃ । એવં ષોડશકોષ્ઠકાનાં સન્ધા ઇતિ । મહાસૂત્રં સર્વરૂપક્ષેત્રે વિધેયમ્ । ઇતિ સૌમ્યઃ પિપ્પલાદો વવ્રે ।
અથ શિલ્પકાશ્યપાઙ્ગિરસકોશલાદયઃ પપ્રચ્છુઃ, ભગવન્તો વાસ્તુકર્માઙ્ગ-અવતારષોડશકલપુરુષપિપ્પલાદાઃ । કેનોપદેવતા રૂપે ભાવં પ્રદદાતિ । કાઃ સન્ધાઃ શ્રેષ્ઠા ઇતિ ।
વરદવ્યાખ્યાનકરસંયુતઃ સ્વસ્તિમુચ્ચાર્ય્ય, સૌમ્યઃ પિપ્પલાદો હોવાચ । આશ઼ૃણુત શિલ્પર્ષયો બિન્દુસન્ધામાદૌ ।

બિન્દુર્બ્રહ્મેવ બ્રહ્મધ્રુવમ્ ॥ ૧૧॥

રૂપકોષ્ઠકાન્તરાલે બિન્દુર્દ્વિધા । બ્રહ્મબિન્દુર્મધ્યબિન્દુર્બ્રહ્મેવ । ઊર્ધ્વમધ્યગઃ સત્યાખ્યબિન્દુઃ દ્વૌ વિશિષ્ટૌ ।

બ્રહ્મ સત્યાદૌ ॥ ૧૨॥

યથાऽऽદિપુરુષસ્ય નાભેઃ પ્રજાપતિઃ સ્રષ્ટા સૃજતિ પ્રજાઃ । બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાત્ યથા જનન્યા નાભિતન્તોર્નાલતન્ત્વવધારણે માતૃકોષે ભ્રૂણ ઉપજાયતે લોકસૃષ્ટૌ, તથા રૂપે ।

બ્રહ્મબિન્દ્વવલમ્બનેન રૂપાઙ્ગાનિ સૌભગાનિ ભવન્તિ ॥ ૧૩॥

તસ્યોર્ધ્વબિન્દુઃ સત્યબિન્દુઃ । ભ્રુવોર્મધ્યે હિરણ્મયેન (૧૨૦) પાત્રેણ બ્રહ્મરસો વિદ્યતે । તદ્રસાદ્ જ્ઞાનં પ્રસરતિ જીવે । તથા રૂપાકલે તદ્ બિન્દ્વવલમ્બનેન રૂપાઙ્ગવૈભવં કલ્પયન્તિ સ્થાપકા ઇતિ । પુરુષીરૂપાર્થં બ્રહ્મકીલસ્ય ત્રિભાગાનાં મધ્યે મર્માર્થં બિન્દું ચિન્તયેત્, યેનોપાયેન રૂપાણિ સુભગાનિ ભવન્તિ, સિદ્ધિં પ્રદદતિ । લોકાઃ પ્રહૃષ્ટા ભવન્તીતિ ।
અથ શ‍ૃણુત શ્રોતારઃ અલઙ્કરણન્યાસમ્ ।

અલઙ્કરણં દૈવભૂષણમિતિ ॥ ૧૪॥

તદ્ભૂષણાત્ પ્રેક્ષાભાવઃ પ્રસરતિ, યાજકા પ્રહસન્તિ । બહુધા ભૂષણં ગ્રાહ્યમ્ । ઉષ્ણીષમ્, રાજ્ઞાં ત્રિવલિકિરીટમ્, કેશગ્રન્થિમ્, ઋષીણાં જટામ્, કર્ણે નાગકડારમ્, લોલમ્, પ્રવર્તમ્, વલયમ્, પૈણ્ડં, કુમ્ભં ચ રચય । કણ્ઠાર્થં કુશચ્છન્દઃ, સ્વર્ણનિસ્પમ્, રજ્જુયુગલમિતિ, કટ્યાં મેખલાગ્રન્થિમ્, વસ્ત્રમાજાનુલુલિતમ્ । ઋષીણાં કૃષ્ણસારચર્મસૂત્રમ્, નારીણામઙ્ઘ્રૌ પઞ્ચવલયમ્, કરે વ્યાલચ્છદઃ, કરતલે રૈખાદીન, દૈવપક્ષે શઙ્ખપદ્માદિનિધિલક્ષણં નિધેહિ । ઇન્દ્રાર્થં વપૂષ્ણીષમ્, પશુપત્યર્થં વિષ્કચર્મ, વ્યાલોત્તરીયાદિ દૈવભૂષણં રચયેતિ । અલઙ્કારદર્શનાન્માનુષાઃ સર્વે પ્રમુદિતા ભવન્તિ ।

પ્રતિમુચઃ રતિઃ પ્રસરતિ ॥ ૧૫॥

રત્યાસ્તદ્દર્શનં ભવતિ । સ એષ રૂપપ્રજ્ઞયા (૧૨૧) બ્રહ્મસાક્ષાત્કાર (૧૨૨) આનન્દમિતિ, એવં વેદે ।

કરમુદ્રા રૂપસ્ય ભાવં જ્ઞાપયતિ ॥ ૧૬॥

શ‍ૃણુ રૂપબોધે મુદ્રાઙ્ગસન્ધાઃ । યજ્ઞકર્મણિ દૈવાઙ્ગે ચ યથા યજ્ઞકૃત્યે હોદ્ગીથાઃ કરાન્ ગાથાભિઃ સહ પ્રદર્શયન્તિ પ્રસારયન્તિ સા મુદ્રા । યજ્ઞસ્ય સાધનમિતિ ।
રૂપે તાં યોજયન્તિ રૂપકારાઃ રૂપેऽત્ર ન ભેદઃ, યત્ક્રિયા રૂપાઙ્ગે પ્રતિફલિતા ભવતિ । મુદ્રાપઞ્ચકં શ્રેષ્ઠમ્ । તર્જનીવરાભયયોગવ્યાખ્યાનમિતિ । યથોદ્ગીથાઃ સદસ્યા ઉત્તરારણ્યામવરારણિચાલને ઉદૂખલપ્રોક્ષણે કરૌ પ્રસારયન્તિ । સ્થણ્ડિલશોધને, કુશાણ્ડિકે, પુરોડાશપ્રોક્ષણે ચ તન્મુદ્રાપઞ્ચકમ્ । તસ્ય પ્રયોગં શ‍ૃણુ સૌમ્યેતિ । અરણિમન્થને, -
ૐ અગ્નયે મથ્યમાનાયાનુબ્રૂહીત્યુચ્ચાર્ય અધ્વર્યુર્મન્ત્રેણાઙ્ગુલિં પ્રદર્શયતિ સા તર્જનિકા મુદ્રા રૂપે સૌમ્યેતિ । યથા ઉદૂખલે હવિર્વૈતાનપ્રસારણાર્થં કરાન્ પ્રસારયન્તિ ઉદૂખલોપરિ સા ધ્વજમુદ્રા રૂપે સૌમ્યેતિ । સ્થણ્ડિલવીક્ષણે યજ્ઞગાથાગાયને-

ૐ યજ્ઞં બ્રૂમો યજમાનમૃચઃ સામાનિ ભેષજેતિ વાક્યમુચ્ચાર્ય્ય બ્રાહ્મણા યથા વૈશ્વાનરં પ્રાર્થયન્તિ કરસમ્પુટેન સાઽઽવાહનીતિ વરમુદ્રા રૂપે સૌમ્યેતિ । પ્રવરકર્મણિ કુશાણ્ડિકાકાલે દર્ભકઙ્કણં કરે ધૃત્વા યથાઽઽચાર્યા વૈશ્વાનરમુત્થાપયન્તિ કરપ્રદર્શનેન સા રૂપેઽભયમુદ્રા રૂપે સૌમ્યેતિ । એવં ચ વરાભયમુદ્રાયુગ્મં રૂપસ્ય બ્રહ્મક્ષેત્રે ધ્યેયં, ન જૈવક્ષેત્રે (પ્રવણ) આભાતિ સા કોષ્ઠકે । પુરોડાશાચ્છાદને યજમાનં પ્રતિ, પુરોડાશવત્સા સુદુઘા લોકેઽસ્મા ઉપતિષ્ઠતીત્યાદ્યુચ્ચાર્ય્ય યથા સદસ્યા એષાં કરાન્ પ્રદર્શયન્તિ, હવિષ-ઇત્યાદિવાક્યેન પુરોડાશસ્વિષ્ટકૃતે યજન્તિ સા યોગમુદ્રા રૂપે, વ્યાખ્યાનમુદ્રાપિ રૂપે સૌમ્યેતિ । ઇતિ મુદ્રાપઞ્ચકં રૂપે ધ્યેયમ્ ।
અથ શ્રુણુત શિલ્પાધ્યેતારઃ શિલ્પે (૧૨૩) બાધ્રસન્ધામ્ ।

બાધ્રં બલં જ્ઞાપયતિ રૂપે ॥ ૧૭॥

બાધ્રમિત્યાયુધં (૧૨૪) । સર્વં તનુવત્ । કૌણપાન્ પ્રતિ દેવાઃ ક્ષિપન્તિ । તદાઽઽયુધસ્ય મન્ત્રબીજાનિ (૧૨૫) ધ્યેયાનિ । મન્ત્રહીનાયુધં લોષ્ટ્રં ભવતિ । તથા ખોદનેઽપિ મન્ત્રમ્ (૧૨૬) ઉચ્ચારયન્તિ સ્થાપકાઃ । તથાઽઽયુધસ્ય દ્વાદશ બીજાનિ જાનન્તિ મન્ત્રિણઃ । મન્ત્રસ્ય સૂક્ષ્મનાદો બીજમિતિ । તદ્યોગેન મન્ત્રક્રિયા પ્રકટી ભવતિ ।
ઇન્દ્રસ્યાયુધં વજ્રઃ । ૐ વં વજ્રાય, વમ્બીજેન પ્રોક્ષન્તિ સા સંહારશક્તિરિતિ (૧૨૭)। મરુતસ્યાયુધં ધ્વજઃ । ૐ ધં ધ્વજાય, ધમ્બીજેન પ્રોક્ષન્તિ । એષા ધૂનન (૧૨૮) શક્તિરિતિ । યમસ્યાયુધં દણ્ડઃ । ૐ દું દણ્ડાય, દુમ્બીજેન પ્રોક્ષન્તિ । સા ઘાતનશક્તિરિતિ । વરુણસ્યાયુધં પાશઃ । ૐ પં પાશાય, પમ્બીજેન પ્રોક્ષન્તિ । સાઽઽકર્ષણી શક્તિરિતિ । ઈશાનસ્યાયુધં શૂલમ્ । ૐ શું શૂલાય, શુમ્બીજેન પ્રોક્ષન્તિ । સા ભેદનશક્તિરિતિ । સોમસ્યાયુધં પાત્રમ્ । ૐ પં પાત્રાય, પમ્બીજેન પ્રોક્ષન્તિ । સા પ્રાણશક્તિરિતિ । વૈશ્વાનરસ્યાયુધં સ્રુક્ । ૐ સ્રું સ્રુવાય, સ્રુંબીજેન પ્રોક્ષન્તિ । સા ત્યાગશક્તિરિતિ । સૂર્યસ્યાયુધં પદ્મમ્ । ૐ પં પદ્માય, પમ્બીજેન પ્રોક્ષન્તિ । સા પ્રલ્હાદિની શક્તિરિતિ । અમ્બાયા આયુધં માલા । ૐ મં માલાયૈ, મંબીજેન પ્રોક્ષન્તિ । સા ધ્યાનશક્તિરિતિ । વિષ્ણોરાયુધં ચક્રમ્ । ૐ હું ચક્રાય, હૂમ્બીજેન પ્રોક્ષન્તિ । સા માયા (૧૨૯) શક્તિરિતિ । કુવેરસ્યાયુધં કુમ્ભઃ । ૐ કં કુમ્ભાય, કંબીજેન પ્રોક્ષન્તિ । સા નિધિશક્તિરિતિ । ગણદૈવતસ્યાયુધમઙ્કુશઃ । ૐ અં અઙ્કુશાય, અમ્બીજેન પ્રોક્ષન્તિ । સા સંયમશક્તિરિતિ ।
રીત્યા નાદયુક્તં રચયન્તિ કારુકારા આયુધાનિ । નાદ ઇતિ મન્ત્રસ્ય રસઃ । સ હિ બીજમિતિ કૃત્યં જ્ઞેયમ્ । ષોડશકોષ્ઠકેષુ રૂપસ્ય કરસંયોગે નેમિસ્પર્શનં ધ્યેયમ્ ।
અથ વાસ્તૂદ્ગીથાન્ પ્રતિ કક્ષાસન્ધાં સૌમ્યાનનો વવ્રે (પિપ્પલાદઃ) ।

આસનષટ્કં મુખ્યમ્ ॥ ૧૮॥

આસનં રૂપસ્ય કૃત્યં પ્રકાશયતિ દેહસ્યાકૃતિઃ પ્રકેતનમિતિ । ઉત્સર્ગા ચાસીન ચેતિ ભેદેન દ્વે મુખ્ય ઇતિ । રૂપાકલે યા ઉત્થિતાસ્તા (૧૩૦) ઉત્સર્ગાઃ । રૂપભેદે યા આસીનાસ્તા આસિકા ઇતિ જ્ઞેયમ્ । યથા યજ્ઞે યજ્ઞકર્મણિ તથા રૂપપ્રયોગે ગ્રાવ્ણિ ચ ।
આસનં ષડ્ધા । યથા યજમાનાઃ સ્વશાલાયાં દર્ભાસને ઉપવિશન્તિ તત્ સુખાસનં રૂપે । યથાઽરણિમન્થને અગ્નિદ્ધ્રા રજ્જું ચાલયન્તિ તદ્ વિષમાસનં રૂપે ।

યથા વેદ્યુપરિ આચાર્યા ઉપવિશન્તિ તત્ સ્વસ્તિકાસનં રૂપે । યથા સૂત્રાયણકાલે રક્ષાવિધાને પિશઙ્કે સૂત્રશ ૃઙ્ખલે તદ્બન્ધનકાલે બ્રાહ્મણા વસન્તિ તદ્ યોગાસનં રૂપે । યથા સવિત્રારાધને દ્વિજા ઉપવિશન્તિ તત્ કુક્કુટાસનં રૂપે । યથા હોદ્રીથા વાજસનેયસંહિતોક્ત સન્ધ્યોપાસનકાલે કરૌ પ્રાચીં પ્રતિ પ્રસારયન્તિ તત્ સૌમ્યાસનં રૂપે, ઇતિ પ્રયોગ । ઇતિ આસનષટ્કં રૂપે યજ્ઞે ચ ।

પપ્રચ્છુરાઙ્ગિરસ શિલ્પકાશ્યપાદિશ્રોતારો ભગવન્તઃ કિમર્થમાસને ભેદા જાયન્તે, કથમુપવેશનાર્થમેતદ્ ધ્યેયમિતિ । ઇત્યગમ્યરૂપબોધાર્થં તેષાં કાઃ સન્ધા પ્રવદન્તુ શ્રદ્ધયા સૌમ્યાઃ ।

આસનાદ્રૂપસ્ય કૃત્યભાવં પ્રચક્ષતે । સુખાસનં રૂપસ્ય શાન્તભાવં પ્રદદાતિ । વિષમાસનં વૈરભાવં ક્ષેપણ-ક્રિયાદિ પ્રકટયતિ । સ્વસ્તિકાસનં પ્રાજ્ઞભાવં પ્રકટયતિ, યોગાસનં બ્રહ્માનુભૂતિમાત્માનુભૂતિભાવં ચ વિજ્ઞાપયતિ । કુક્કુટાસનમુદ્ગ્રીવભાવં પ્રકાશયતિ । સૌમ્યાસનં સ્થૈર્ય પ્રદદાતિ । રૂપાકલાર્થમેતદ્ ધ્યેયમ્ । સર્વે શિલ્પાચાર્યા બ્રહ્મક્ષેત્રે ષોડશકોષ્ઠકાન્તરાલે નેમિમધ્યે રૂપાન્વયે એતદાચરન્તિ ।

શ ૃણુત પ્રિયઙ્કરશ્રોતારઃ, રૂપાકલે દૈવવાહનસ્ય (૧૩૧) સન્ધાઃ । વાહનાનિ રૂપસ્ય ગુણાન્ પ્રકાશયન્તિ વિજ્ઞાપયન્તિ ।

ગુણાનુસૃતં રૂપત્રયમ્ ॥ ૧૯॥

સત્ત્વાત્ સાત્ત્વિકાનિ રજસો રાજસાનિ તમસસ્તામસાનીતિ ભેદાઃ । યાનિ રૂપાણિ સાયુજ્યં પ્રદદતિ તાનિ સાત્ત્વિકરૂપાણિ । યાનિ કાયસુખપ્રદાયકાનિ તાનિ રાજસાનિ । યાનિ રૂપાણ્યરિં પ્રતિ મૃત્યુપ્રદાનિ તાનિ તામસાનિ (૧૩૨) ।

ગુણાનુક્રમેણ વાસ્તુવેદસ્ય રૂપવિદ્યા ઇતિ વ્યાખ્યાનમ્ । ય એનાં વેદ । શ ૃણુ વાહનસ્વરૂપમ્-

વાહનં રૂપસ્ય પ્રકૃતિજ્ઞાપકવિશેષઃ ॥ ૨૦॥

યથા ઇન્દ્રો (૧૩૩) દિગ્ગજાનાકર્ષતિ । પર્જન્યં વર્ષયતિ । તથાઽઽકર્ષણાત્મકં ઐરાવતમારોહતિ । યથા યમો જીવસ્ય પ્રાણાનાકર્ષતિ, તથા ઘોરમહિષમ્ (૧૩૪) આરોહતિ । યથા વૈશ્વાનરો યાજ્ઞિકૈર્દીપ્તો ભવતિ, તથા મેષમ્ (૧૩૫) આરોહતિ । યથા એકાયને સવિતા ભ્રમતિ સપ્તતન્તુસ્તથૈકરથાઙ્ગાઢ્યરથમ્ (૧૩૬) આરોહતિ ।

યથા રુદ્રો ધર્મં સઞ્ચારયતિ તથા ધર્મવૃષભમ્ (૧૩૭) આરોહતિ । યથા પ્રજાપતિર્જ્ઞાનેન પ્રજા આકર્ષતિ તથા હંસં (૧૩૮) આરોહતિ । યથા વિષ્ણુર્મોક્ષં પ્રદદાતિ તથા સુપર્ણમ્ (૧૩૯) આરોહતિ । યથાઽમ્બા (રિપુ) વર્ગં નાશયતિ તથા દ્વીપિનમ્ (૧૪૦) આરોહતિ ।

વાહનાનિ ષોડશકોષ્ઠકે જૈવક્ષેત્રે ધ્યેયાનિ । રૂપે બ્રહ્મક્ષેત્રસ્ય નિમ્ને, અધોઽન્યચ્ચ શ્રેયઃ । આશ ૃણુ ઉપદૈવતસ્ય સન્ધાઃ । સૌમ્ય પિપ્પલાદો વવ્રે (૧૪૧)।

ઉપદૈવતં પ્રતિરૂપમિતિ ॥ ૨૧॥

પ્રજાપતેરેતે સર્વે દેવા ઇમાનિ પઞ્ચ મહાભૂતાનિ તદ્ગુણા પૃથિવીવાય્વાકાશાબ્જ્યોતિરિત્યેતાનિ જાયન્ત ઇતિ । તદ્ભૂત-જ્ઞાનાત્ સ્વસ્વગુણભાવરૂપ ઇવ પ્રચક્ષતે । તદ્ભૂત-જ્ઞાનાદુપદૈવતભાવાઃ સન્તિ ।

યથા વૈશ્વાનર (૧૪૨) ઇતિ બ્રહ્મ । સ યજ્ઞઃ । યજ્ઞસ્ય દાહિકા (૧૪૩) શક્તિઃ સ્વાહા । પચનાત્મિકા સ્વધા (૧૪૪)। ઇત્થમુપદૈવભાવઃ પ્રથિતઃ પ્રસરતિ તત્સપર્યાયામિન્દ્રસ્ય પ્રજનનશક્તિરિન્દ્રાણી (૧૪૫)। મારુતસ્ય વેગિની શક્તિર્વાયુનાયી સા દ્રુતા ।યમસ્ય દ્વૌ ગુણૌ, પાલિકાઽવનાશિકેતિ । તસ્ય પાલિકા શક્તિરાકુતિઃ (૧૪૬) , અવનાશિકા મૃત્યુરિતિ (૧૪૭)। વરુણસ્ય પ્રવાહિકા શક્તિર્વારુણી (૧૪૮)। સોમસ્ય ધારિકા શક્તિરિલેતિ (૧૪૯) । સૂર્યસ્ય સવિતુરવલમ્બિની શક્તિશ્છાયા (૧૫૦) । સાઽઽવેશિની શક્તિરુષા (૧૫૧)।

વિષ્ણોર્મુક્તિપ્રદા શ્રીશક્તિર્હિરણ્યવર્ણા હરિણી (૧૫૨) ધારિણી શક્તિઃ પૃથિવી (૧૫૩)। શેષસ્ય સહના શક્તિઃ ધૃતિર્વ્યાપિની શક્તિઃ વિધૃતિઃ યથા ક્ષમાઽન્નધૃતિરિતિ । વિધૃતિઃ સૌખ્યમિતિ । હિરણ્યગર્ભસ્ય કાલાત્મિકા શક્તિઃ । ગાયત્રી (૧૫૪) જ્ઞાનરૂપા, સાવિત્રી (૧૫૫) મેધારૂપા, સરસ્વતી (૧૫૬) પ્રજ્ઞારૂપા । દેવી વિશિષ્ટા ત્રિકાલરૂપા ચ ।

રાષ્ટ્રયા (૧૫૭) રુદ્રેતિ । તસ્ય પ્રજનનશક્તિરમ્બાઽમ્બાલિકા (૧૫૮,૧૫૯) ચેતિ દ્વે । દુર્ગાયા રક્ષણશક્તિઃ સુન્દરી મોહિની ચેતિ દ્વે આકર્ષણરૂપે । એતત્ક્રમે દૈવગુણસ્યાનુક્રમે ઉપદૈવતાનિ જાયાભાવેન જાયન્તે । તદેતલ્લક્ષણાનિ ।

અથ પ્રતિકીર્ણમાથર્વણાઙ્ગિરસશિલ્પકાશ્યપ-કુવિત્સ-કોશલાદયઃ પ્રણમ્ય પપ્રચ્છુઃ, ભગવન્તઃ પિપ્પલાદા દિવ્યપુરુષાઃ કથં કા હેતય ઇત્યબોધ્યમિતિ વિશદેન બ્રુવન્તુ સૌમ્યાઃ । દિવ્યપુરુષપિપ્પલાદો વવ્રે । શિલ્પોદ્ગીથાઃ શ◌ૃણુત વક્ષ્યામો વિસ્તરેણ અપસાર્થમમુથ ઉપરૂપાકલસ્યાનુશાસનં પૂર્વં વેદેન યથોક્તમ્ ।

પ્રજાપતિરસૃજત્ કાલમ્ । દક્ષિણોત્તરૌ દ્વૌ । ઉત્તરાદ્દેવા દક્ષિણાત્પિતરઃ । ઉત્તરાત્સવિતા દક્ષિણાચ્ચન્દ્રમાઃ । પ્રતિકામમૃષયો દક્ષિણં પ્રતિપાદયન્તિ । તત્ પિતૃયાનં રાત્રિરિતિ । બ્રહ્મચારિણો મોક્ષકામા ઉત્તરમ્પ્રતિપાદયન્તિ । તદ્ધિ દેવયાનં દિવમ્ । દક્ષિણાદર્યમલોકાઃ પઞ્ચપાદપિતરઃ (૧૬૦)। ઉત્તરાદ્દ્વાદશાકૃતિદિવમાહુઃ । એતન્ન્યાયે ગુણેનૈકં બ્રહ્મ દ્વાદશધા ભવતિ । તથા હિ સૂર્યો જ્યોતિષાં પતિરિતિ ગુણાનુસૃતેર્દેવસ્તલ્લક્ષણાનુસૃતે રૂપાણિ, તતઃ પ્રતિરૂપાણિ જાયન્તે । એતત્સત્યમ્ ।

યથા યજ્ઞાત્ ત્યાગ (૧૬૧) ઇતિ મુખ્યમ્ । દૈવભાવે તત્સ્વાહા (૧૬૨) । ત્યાગવૃત્તિરિતિ સ્વાહા । ભોગ્યમિતિ સ્વધા, ઇદં પિતૃભાવઃ ।

યથા વિષ્ણુર્મોક્ષં દદાતિ । મોક્ષ ઇતિ શ્રીઃ । ભોગ્યરૂપેણ પૃથિવી ભોગ્યા (૧૬૩) । યથા રુદ્રસ્ય મોક્ષગુણાદમ્બા, ભોગવૃત્ત્યાઽમ્બાલિકેતિ દ્વે । યથેન્દ્રસ્ય ત્યાગવૃત્ત્યા યજ્ઞાઃ, ભોગવૃત્ત્યેન્દ્રાણીતિ । યદા ગુણા બહુધા ઉપવૃત્ત્યા (તદા) બહુધા પ્રતિરૂપાણિ ભવન્તીતિ પરિપશ્યન્તિ ધીરાઃ ।

યથા વૈશ્વાનરસ્ય સપ્ત વૃત્તય ઉત્થાનાદ્ વિલયાન્તં પ્રવદન્તે । ક્રમેણ તાઃ સ્નિગ્ધા, ધૂમ્રા, તપ્તા, ઉત્તપ્તા, દાહિકા, ભસ્મા, નિર્વાણેતિ । એતત્ક્રમેણાગ્નિસ્તપતિ । તદ્ગુણાત્ સપ્ત જિહ્વા જાયન્તે । જિહ્વાયાઃ પ્રતિરૂપાણિ કલ્પયન્તિ । (પૂર્વક્રમેણ) કાલી, કરાલી, મનોજવા, સુલોહિતા, સુધૂમ્રવર્ણા, સ્ફુલિઙ્ગિની, વિશ્વરુચી ઇત્યેતાઃ સર્વાઃ સ્ત્રીરૂપાઃ રૂપભાવે ગ્રાહ્યાઃ ।

યથા શ્રુતિરિતિ મહતી । સા મેધારૂપેણ ભારતી સમ્ભવતિ । મેધાયા યથા વાણી પ્રભવતિ તથા શ્રુતેર્મહતી મહીયસી સરસ્વતી (૧૬૪) જાયતે પરાવિદ્યાયા રૂપા । તત્તદાકારાત્મિકાઃ પુષ્ટિભાવેન લક્ષ્મીદેવહૂત્યાદયઃ । એતાઃ સર્વાઃ ષોડશક્ષેત્રસ્ય દ્વિપાર્શ્વે દૈવક્ષેત્રે તત્તદ્રૂપસ્ય જાયાભાવેનોપદૈવતાનીતિ સત્યં ધ્યેયં -રૂપકારા વાસ્તૂદ્ગીથાઃ ।

ઉપદૈવતાદ્રૂપજ્ઞાનં પ્રસરતિ ॥ ૨૨॥

સપર્યયા ભૂતવિદ્યાઃ (૧૬૫) પ્રશમ્યન્તિ ।

અરિસન્ધા ધ્યેયા ॥ ૨૩॥

રૂપધારાયા વૃત્તિરિતિ શ્રેષ્ઠા ॥ ૨૪॥

અથ રૂપધારાયાઃ શ◌ૃણુ વૃત્તિભેદાન્ । યથા વૃત્ત્યાઃ પરિણામઃ । પ્રાજાપત્ય -પ્રથમ-વૃત્તિર્મનઃ (૧૬૬)। મનસો વૃત્તિઃ પ્રાણઃ (૧૬૭) । પ્રાણસ્ય વૃત્તિઃ ક્રિયા । ક્રિયા હિ વિદ્યા (૧૬૮) । સા દ્વિવિધા કથયન્તિ ઋષયઃ । સદસદ્વિધેયમ્ । યા ઋતસ્ય ધારા સા દૈવક્રિયા । સા પરા વિદ્યા । યા અનૃતા સા અક્રિયા । સા અદૈવા અપરેતિ । તદપરાજ્ઞાનાદસુરાઃ । અહર્દેવા આશ્રયન્તે રાત્રિમસુરાઃ (૧૬૯) ।

યેષાં ભયશોકાઃ સન્તિ, યથા નિકન્દિનઃ, કણ્વજમ્ભાઃ, યાતુધાનાઃ, પૃશ્નિપર્ણ્યાદયોઽવયોનયો ગુણાનુભેદેનૈતે સર્વેઽન્યાર્થઘાતકાઃ સર્વેઽરિણો દેવે ચ લોકે યજ્ઞં ઘાતયન્તિ । એતે સર્વે શલભક્ષકા બીભત્સરૂપાઃ કોકમુખા રુક્ષગ્રીવાઃ શિમિજાઃ (૧૭૦) । સર્વે વૈરાજ્યકિમ્પુરુષાઃ ક્ષુધા દૈવઘાતકાઃ । એતાનરીન્ ષોડશકોષ્ઠકરૂપક્ષેત્રે મર્દિતરૂપેણ જૈવક્ષેત્રે આચરન્તિ પ્રતિરૂપચર્યાયામ્ । એતે શલભક્ષિણો દેવાનાં ભયદા ભવન્તિ । એતૈસ્તેષાં દુઃખમ્ । યજ્ઞાત્ તરન્તિ । એતદર્થં કેચિદ્વા ઋષીન્ ધ્યાયન્તિ દેવાઃ । દેવયજનાન્મુનયો મનસ્વિનો ભવન્તિ । દૈવભાવેન દેવાર્થં હોતારોઽન્નસમિધઃ ક્ષિપન્તિ વૈશ્વાનરે । ઋષયઃ સ્તોતારો ભવન્તિ ।

સ્તોતૃણાં રૂપે સુભગવિશેષઃ (૧૭૧) ॥ ૨૫॥

ગાથાઃ (૧૭૨) પઠન્તિ । જના યજન્તિ બહુધા રૂપં સર્વક્રિયાધારઃ મનુષ્યલોકે રૂપવિદ્યા । નાદઃ સત્યમિતિ ધ્યેયમ્ । રૂપં ચરન્તિ વાસ્તુવેદિનઃ સ્થાપકા વાસ્તૂદ્ગીથાઃ । સ્તોતૃણાં બહુધા પૈલા નાલન્દિનોઽપ્સરસો દેવાન્ મોદયન્તિ મોદકાઃ ।

કાયમનોવાક્યેન ગાયન્તિ તે સ્તુવકા ભ્રાજિનઃ । યક્ષા ગાયન્તિ ગાથાઃ । ગન્ધર્વા (૧૭૩) દેવાનન્દાર્થં નૃત્યન્તિ । સર્વે મિશ્રયોનયઃ ષોડશકોષ્ઠકક્ષેત્રે ઊર્ધ્વકોણગતક્ષેત્રે નિધેયાઃ ઉપદૈવક્ષેત્રે ।

યે નરા દૈવભાવપરાયણાસ્તે યાજકા । ધ્યાને તેષાં સત્તા દિવ્યેવ વિભાતિ । તાન્ જૈવક્ષેત્રસ્ય પાર્શ્વગતક્ષેત્રે અધઃક્ષેત્રદ્વયે ન્યસેત્ । એવં દૈવરૂપં ષોડશકોષ્ઠકે ધ્યેયમ્ । તે તુ ધન્યા યે ક્રતૂંશ્ચ યજ્ઞાનાચરન્તિ ઉપાસન્તે રૂપાણિ । રૂપજ્ઞાનાદ્ પ્રજ્ઞા પ્રભવતિ લોકે ।

પ્રજ્ઞાર્થમેતદ્ વાસ્તૂપાખ્યાનમ્ ॥ ૨૬॥

એતદર્થં પ્રજ્ઞાં વ્યાખ્યાપયામ ઇતિ । વાસ્તુસૂત્રોપનિષદ્ ભગવતઃ પિપ્પલાદસ્ય ભવ્યં વ્યાખ્યાનમ્ । યો જાનાતિ સ રૂપાચાર્યો ભવતીતિ વાસ્તૂદ્ગાતા ઇતિ ધ્યેયમ્ । યે ધ્યાયન્તિ તે મુક્તાઃ । પરમઋષિભ્યો નમઃ।

સ્તુતા મયા વરદા વેદમાતા

પ્ર ચોદયન્તાં પાવમાની દ્વિજાનામ્ ।

આયુઃ પ્રાણં પ્રજાં પશું કીર્તિં દ્રવિણં બ્રહ્મવર્ચસમ્ ।
મહ્યં દત્ત્વા વ્રજત બ્રહ્મલોકમ્ ॥

(અથર્વ ૧૯.૭૧.૧)
ઇતિ ૐ નમો વિશ્વકર્મણે ।
ૐ વિશ્વકર્મા મા સપ્તઋષિભિરુદીચ્યા દિશઃ પાતુ તસ્મિન્ ક્રમે તસ્મિઞ્છ્રયે તાં પુરં પ્રૈમિ ।
સ મા રક્ષતુ સ મા ગોપાયતુ તસ્મા આત્માનં પરિ દદે સ્વાહા ॥

ઇતિ (અથર્વ ૧૯.૧૭.૭)
ઇતિ ષષ્ઠપ્રપાઠકઃ સમાપ્તઃ ॥

પરમઋષિભ્યો નમઃ । પરમઋષિભ્યો નમઃ ।
સમ્પૂર્ણેયં વાસ્તુકર્માવતારપિપ્પલાદસ્ય આથર્વણીય વાસ્તુસૂત્રોપનિષત્ । ઉડ્રદેશિકેન આથર્વણોદ્ગાત્રા સોમભટ્ટેન કૃતા પરિશુદ્ધિટિપ્પણી સમાપ્તા ।
ઇદં આથર્વણીય વાસ્તુસૂત્રોપનિષદ્ અથર્વણાચાર્યસોમભટ્ટેન કૃત વિષયબોધિનિટિપ્પણી સમેત લિખિતં મયા બાઙ્કી કુરુમચૈનિ ગ્રામવાસિના વાસ્તુશાસ્ત્રિ કામદેવ ઉદ્ગાથા શ્રી રામચન્દ્રદેવ ભૂપાલસ્ય પઞ્ચદશાઙ્કે રાજા હરિચન્દન નૃપાર્થ । ૐ નમો મહાદેવ્યૈ ॥

## ટિપ્પણી

Footnotes of Vastusutropanishat

(૧) અથર્વ ૧૧.૪.૧૬ મણ્ડલોક્તઋષિવિશેષઃ । ૧૯ કાણ્ડે પઞ્ચમાનુવાકસ્ય પ્રવર્તક ઋષિઃ અઙ્ગિરાઃ ।
(૨) કાશ્યપશિલ્પસૂત્રકારઃ શિલ્પકાશ્યપનામા ઋષિઃ ।
(૩) આથર્વણીય- ષોડશવિધ- તાપિનીગ્રન્થાઃ-અવધૂતતાપિની, ત્રિપુરાતાપિની, નૃસિંહતાપિની, પુરુષતાપિની, વૃષતાપિની, ઇત્યાદયઃ સર્વે આથર્વણીયાઃ ।
(૪) વાસ્તુવિષયકસૂત્રાણિ ।
(૫) વાસ્તુદૈવતં વાસ્તોષ્પતિરિત્યર્થઃ ।
(૬) કાશ્યપશિલ્પસૂત્રસ્ય દેવશિલ્પ-પ્રાસાદશિલ્પ-નગરશિલ્પ-દુર્ગશિલ્પ-ધાતુકરણ-લેખવિચારાદિ વિષયાઃ ।
(૭) રૂપશિલાસ્થાપનાર્થં શુભયોગે દર્ભોત્પાટક આથર્વણબ્રાહ્મણવિશેષઃ ।
(૮) શિલ્પાધિદૈવતમ્, અથર્વવેદસંહિતાયામુક્તમ્ । વિશ્વકર્માણં તે સપ્તઋષિવન્તમૃચ્છન્તુ, અથર્વ૦ ૧૯.૧૮.૭ ।
(૯) પૈપ્પલાદસંહિતાયાં પ્રથમકાણ્ડે ઉક્તં - શ્યામા સરૂપઙ્કરણી પૃથિવ્યા અધ્યુદ્ભૃતા । ઇદમૂ ષુ પ્ર સાધય પુના રૂપાણિ કલ્પય ॥ ૧.૨૬.૫ (શૌ ૧.૨૪.૪)
(૧૦) મૂર્તિશ્ચતુર્વિધા પ્રોક્તા મૃણ્મયી શૈલી એવ ચ । ધાતવી દારવી ચૈવ પૂજનાર્થે વિશેષતઃ ॥

(૧૧) આદિત્યો યૂપ ઇતિ ઐતરેયે ઉક્તં તથા તૈત્તિરીયે ચ ।

(૧૨) અથર્વવેદે વૈતાનસૂત્રમિતિ । અથર્વવેદે ૧૩.૧.૪૭ ઉક્તમ્ । પુનઃ યૂપમુગ્રા મરુતઃ સ્કમ્ભહિમં ધ્રંસં ચાધાય યૂપાન્ કૃત્વા પર્વતાન્ । ઇન્દ્રેણ મન્ત્રે ઉક્તં પુનઃ અથર્વવેદે યૂપ સ્કમ્ભરૂપેણ ઉક્તશ્ચ દશમકાણ્ડે ચતુર્થાનુવાકે દૈવતરૂપેણ ।

(૧૩) ગૃહ્યસૂત્રે ચ અથર્વવેદે ૭ કાણ્ડે નવમાનુવાકે ૩ સૂત્રે ઉક્તમ્ । શતપથબ્રાહ્મણે "વાસ્તુ હિ તદ્ યજ્ઞસ્ય યદ્ ધૃતેષુ હવિષુ" ઇતિ ઉક્તમ્, તદ્ દેવતા વાસ્તુપુરુષઃ શિખિન્યાદિ ઇતિ ।

(૧૪) બ્રહ્મસુખં હિ મધુ ઇતિ અથર્વવેદે ૧.૩૪.૧ ઉક્તમ્-

ઇયં વીરુન્મધુજાતા મધુના ત્વા ખનામસિ ।

મધોરધિ પ્રજાતાસિ સા નો મધુમતસ્કૃધિ ॥

(૧૫) પ્રતિમા - અથર્વવેદે ૯.૪.૨ ઉક્તં - અપાં યો અગ્રે પ્રતિમા બભૂવ પ્રભૂઃ સર્વસ્મૈ પૃથિવીવ દેવી ઇતિ । વાજસનેયિસંહિતાયામુક્તં - અસૌ વૈ લોકઃ પ્રતિમેષા હ્યન્તરિક્ષલોકે પ્રતિમા ઇવ ઇતિ ॥

(૧૬) ઋત્વિગ્વિશેષાઃ આથર્વણપુરોહિતાઃ ।

(૧૭) અથર્વવેદે ૨.૮.૧ કાણ્ડે ઉક્તં ઉદગાતાં ભગવતી વિચૃતૌ નામ તારકે । ઇતિ ॥

(૧૮) પૌલસ્ત્યસ્ય અપત્યં વિશ્રવાપુત્રઃ રાવણઃ ।

(૧૯) અથર્વ ૯.૪.૨

(૨૦) પ્રયોગાત્મકસૂત્રમિતિ ખિલમ્ ।

(૨૧) ભીત્ત્યાકારે મહાશૈલે દૈવલીલાદયો યથા । રૂપશાલા તપસ્વિનાં મોદાર્થમભિખોદિતા । ઇતિ કાશ્યપવચનમ્ ।

(૨૨) સ્તમ્ભ ઇતિ યૂપઃ યૂપઃ વૈ સ્તમ્ભ (સ્કમ્ભ) ઇતિ અથર્વવેદે ૧૦.૭ ઉક્તમ્ ॥ પ્રયોગભેદે સ્કમ્ભત્રયં બ્રહ્મયજને સ્કમ્ભો વૈ યૂપઃ, પિતૃયજને વૃષસ્તમ્ભઃ, કામયજને મિથુનસ્કમ્ભ ઇતિ ભેદઃ ।

(૨૩) યદ્ગુહ્યં અધિકોપાયેન વિગ્રહપ્રામાણ્યં ભવતિ । સા ખિલપઞ્જરવિદ્યા, અસાધારણી ઇત્યર્થઃ, ગુહ્યં રેખાજ્ઞાનમિતિ ।

(૨૪) ઉદ્ગીથમુપાસાઞ્ચક્રે । એતમેવાઙ્ગિરસં મન્યે । અઙ્ગાનાં યદ્રસઃ । આત્મજ્ઞાઋષિવિશેષઃ ।

(૨૫) સપર્યોપયોગિની પ્રતિમા ।

(૨૬) તૈત્તિરીયબ્રાહ્મણોક્તઃ નક્ષત્રવિશેષઃ યઃ શુભદાયકઃ, અભિજિન્નામ નક્ષત્રમુપરિષ્ટાદિતિ વાક્યમ્ ।

(૨૭) અથર્વ ૨૦.૧૩૭.૩

(૨૮) એકવર્ણા કપિલા ગૌઃ પુરુરૂપા ગૌરિતિ ભાવઃ । દૈવતન્ત્રે શક્તિપ્રાપ્તા ગાવ । અથર્વવેદે ૧૦.૧૦.૬ ઉક્તં "સ્વધાપ્રાણા મહીલુકા" ઇતિ ।

(૨૯) કુમ્ભીકામોચનાર્થં અથર્વવેદે ૧૬.૬.૮ ઉક્તમ્-ૐ કુમ્ભીકા દ્રૂષીકાઃ પીયકાન્ । ઇતિ ।

(૩૦) શતકેશી રુદ્રરૂપો મહાવૃષઃ । અથર્વવેદે ૫.૨૨.૮ ઉક્તઃ । યથા- મહાવૃષાન્ મૂજવતો બન્ધ્વદ્ધિ પરેત્ય । પ્રૈતાનિ તક્મને બ્રૂમો અન્યક્ષેત્રાણિ વા ઇમા । ઇતિ ।

(૩૧) તાપવર્ગપ્રદયોનિવિશેષાઃ તથા ચ અથર્વવેદે ૧૯.૩૫.૨ ઉક્તં સ નો રક્ષતુ જઙ્ગિડો ધનપાલો ધનેવ ઇતિ ।

(૩૨) કાશ્યપસંહિતાશિલ્પશાસ્ત્રે પ્રથમાધ્યાયે ઉક્તં -યુજુવદણ્ડસંયુક્તં વલયં વેષ્ટિતં તથા । રજ્જુદ્વિમુષ્ટિ યસ્યાગ્રેઽપ્યયઃ કીલસઘૂર્ણિકા ઇતિ ।

(૩૩) અથર્વવેદે ૬.૧૯.૧ અયં મન્ત્રઃ । મર્મનિર્ધારણે ઉપાધ્યાયાઃ પવમાનસૂક્તં પઠન્તિ ઇત્યાચારઃ ।

(૩૪) પાતનં મર્દનં ચૈવમઙ્કનં સા ત્રિધા ક્રિયા । ખોદનોત્તરકર્માણિ સ્થાપકઃ સંસ્મરેત્ સદા ॥ કાશ્યપસંહિતા અ। ૧, શ્લો ૧૪ ।

(૩૫) શુક્લશિલાચૂર્ણમિતિ વજ્રરેખાઙ્કનસ્યોપાદાનમ્ ।

(૩૬) કીર્ત્તિરિતિ રૂપં સા પ્રતિમા તસ્યાઽઽધારઃ રેખાપઞ્જર ઇતિ ।

(૩૭) ન મૃણ્મયપ્રતિમાર્થં રેખાન્યાસસ્ય પ્રયોજનમ્ ।

(૩૮) વૃત્તબિન્દુવિષયાણિ વિશદરૂપેણ પિપ્પલાદીયપ્રણવતારકે ધ્યેયાનિ ।

(૩૯) ૐ વિશ્વકર્માય (વિશ્વકર્મણે) વિદ્મહે કારુકારાય ધીમહિ તન્નો શિલ્પી પ્રચોદયાત્ ।

(૪૦) ૐ વિશ્વકર્માય (વિશ્વકર્મણે) નમઃ, ઇતિ તસ્યાષ્ટાક્ષરો મન્ત્ર ઇતિ ।

(૪૧) ન યજ્ઞશુલ્વપ્રયોગે વિશ્વજ્યોતિરિત્યાદિનિર્માણે પ્રયોજનમ્ ।

(૪૨) દૃશ્યરૂપેણ શિલોપરિ ઇતિ ભાવઃ ।

(૪૩) યસ્મિન્ દેશે યથાકારે દેવલીલા પ્રવર્ત્તતે ।

(૪૪) તાલાંશજ્ઞાનસમ્પ્રાપ્તે શિલ્પી સ્થાપક ઉચ્યતે । રેખાન્યાસં યો જાનાતિ સ રૂપજ્ઞો ભવેત્ તથા । શિલ્પરહસ્યાગમે ૪, ૨ ઉક્તમ્ ।

(૪૫) પ્રજાપતિરેતે સર્વે દેવા ઇમાનિ ચ પઞ્ચમહાભૂતાનિ વાયુરાકાશ આપો જ્યોતિરિત્યેતાનીમાનિ ચ ક્ષુદ્રમિશ્રાણિ ઐતરેયે પઞ્ચમખણ્ડે ઉક્તમ્-તથા હિ વાસ્તુવેદે સમ્યક્ ભિન્નતા જાયતે, દૃશ્યતે ।

(૪૬) સર્વરૂપશૈલસ્ય આધારઃ ચતુરસ્રમ્ ।

(૪૭) અશ્મના હ્યાપઃ પ્રભવન્તિ । શતપથબ્રાહ્મણે નવમાધ્યાયે ઉક્તમ્ ।

(૪૮) મધ્યદૈર્ઘ્યમધ્યપ્રસ્થયોર્મધ્યબિન્દુમવલમ્બ્ય ।

(૪૯) વ્યોમ ઇતિ ભાવઃ ।

(૫૦) દ્યાવા-પૃથિવીં સઞ્જાનીથ, અથ વર્ષતિ, શતપથે ઉક્તમ્ । અથર્વ ૧૨.૧ ઉક્તં અર્ણવભૂમ્યાત્ પરમ વ્યોમ જાયતે ઇતિ ભાવઃ ।

(૫૧) અગ્નિરૂપં ત્રિભુજક્ષેત્રમ્ ।

(૫૨) હુતમિતિ રેખા, ત્રિરેખેણ યત્ ક્ષેત્રં તત્ ત્રિહુતં ભવતિ ।

(૫૩) દિવ્યં દૈવીભાવઃ । અથર્વસંહિતાયામુક્તં ૨.૧૨.૪- પિતૃણામામું દદે હરસા દૈવ્યેન ઇતિ ।

(૫૪) ગુહ્યોક્તવિધિના અગ્નિસ્થાપને બ્રહ્મોપદેશને સ્થણ્ડિલે ષટ્કોણલિખનાનન્તરં વિષ્ટરદ્વયં સ્થાપયન્તિ । તદુપરિ અગ્નિં સ્થાપયન્તિ, ઇતિ અગ્નિસન્ધાનવિધિઃ ।

(૫૫) તન્ત્રે તથા કાલિકોપનિષદિ ઉક્તમ્-કૂર્ચબીજં વ્યોમષષ્ઠસ્વરા બિન્દુમિલનરૂપાઃ, તદ્દ્વયં માયાદ્વયં દક્ષિણે કાલિકેતિ ।

(૫૬) યાતુધાનઃ નિર્ ઋતેરાદિવાક્યાત્ તાપવર્ગપ્રદો યોનિવિશેષ ઇતિ અથર્વવેદે ઉક્તમ્ ।

(૫૭) મણ્ડુવંશજોતઃ કૌત્સસ્ય શિષ્યઃ ઋષિવિશેષ ઇતિ બૃહદારણ્યકે ઉક્તમ્ ।

(૫૮) પ્રયોગરૂપેણૈતત્ ષડ્ધાઙ્ગુનોપાદાનમ્, વ્યોમાભાસે મણ્ડલઞ્ચ ચતુરસ્રોપસઞ્જ્ઞકઃ કોણરેખા । વાયુશ્ચ કર્ણિકાપૃથિવી તથા ત્રિભુજમગ્નિરૂપઞ્ચ ષટ્કોણં દૈવમન્દિરમ્ । કાશ્યપવચનમ્ ।

(૫૯) રૂપક્ષેત્રે ખનિત્રેણાવિશન્તિ, સિતવજ્જરેખાયાં તતઃ અયસા ખોદયન્તિ મૂલમ્ ।

(૬૦) વાસ્તુયાગે શિલાનિર્મિતસૌમ્યયૂપઃ વિષ્ણુયજ્ઞે ષોડશાંશવિશિષ્ટશિલાયૂપઃ વિધેય । પિતૃયજ્ઞે દારવી વૃષયૂપસ્ય પ્રયોજનં ભવતિ ।

(૬૧) ઇન્દ્રે લોકા ઇન્દ્રે તપ ઇન્દ્રેઽધ્યૃતમાહિતમ્ । ઇન્દ્રં ત્વા વેદ પ્રત્યક્ષં સ્કમ્ભે (યૂપે) સર્વં પ્રતિષ્ઠિતમ્ ॥ (૧૦.૭.૩૦) અથર્વવેદે એવં બહુધા ઉક્તમ્ ।

(૬૨) સમમાનેન સૂત્રપાતનેન રેખાઃ સૌમ્યા ભવન્તિ ।

(૬૩) દૈર્ઘ્યરેખાઃ ।

(૬૪) પ્રસ્થરેખાઃ ।

(૬૫) પૈપ્પલાદસંહિતાયાં પ્રથમખણ્ડે રૂપસ્ય સ્વરૂપવિષયે ઉક્તં - રૂપં રૂપવયોવસ્તેન ત્વાં પરિદધ્મસિ, ઇતિ રૂપભાવસ્ય ધારણા ।

(૬૬) અન્નાદ્ ભવન્તિ ભૂતાનિ પર્જન્યાદન્નસમ્ભવઃ ઇતિ ગીતાયાઃ ૩.૧૪, તૈત્તિરીયોપનિષદિ ૨.૨ અપિ ચ પ્રશ્નોપનિષદિ ષષ્ઠપ્રશ્ને ઉક્તમ્ ।

(૬૭) મૂર્તિકારા હિ સ્થાપકાઃ, તે સ્થાપકોદ્ગીથા ઇતિ ।

(૬૮) મૂર્તિદર્શનમાત્રેણ યદ્ભાવો મનસિ જાયતે સા રૂપપ્રેરણા ।

(૬૯) રૂપમધ્યે યથાકીલં કીલાભાસે યદઙ્ગકઃ । યો જાનાતિ ઇમં ભાવં મર્મજ્ઞઃ સ ઇતિ સ્મૃતઃ ॥ શિલ્પરત્નકોષે દ્વિતીયસર્ગે ૧૮ શ્લોકે ઉક્તમ્ ॥

(૭૦) ચાક્ષુઃ સ્થપતિ-શ્રેષ્ઠ ઇતિ પાટવચાક્ષુશતપથે ઉક્તમ્ ।

(૭૧) દારવી મુષ્ટિમાનેન કીલાન્ સઙ્ગૃહ્ય યત્નતઃ । ચતુઃપાર્શ્વે યદા શિલા તદા તુ અવરોધનમ્ । ઇતિ શિલ્પરત્નકોષે રોધનક્રિયા ।

(૭૨) ગાથાં ગાયન્તિ ગાથિનઃ યથા કુન્તાપસૂક્તાનિ અથર્વવેદે (૨૦.૧૨૭ ૧) ઉક્તાનિ “ઇદં જના ઉપ શ્રુત નરાશંસ સ્તવિષ્યતે” ઇત્યાદિજટાક્રમેણ પઠન્તિ ગાથિનઃ ।

(૭૩) અથર્વસંહિતાયાં ૩.૧૨ : શાલાયા ધ્રુવા-સ્તમ્ભઃ; અશ્વાવતી-ભિત્તિઃ; સ્થૂણા-વંશસ્તમ્ભઃ; કુમ્ભ-ધારકકાષ્ઠાનિ; નિર્માણેઽપિ ખનિત્રપ્રયોજનં ભવતિ ।

(૭૪) વનવાસિનઃ ।

(૭૫) મણ્ડલકરણાર્થં સૂચીમુખાકૃતિ (રજ્જ્વે) શોણપ્રસ્તરન્યાસિતશસ્ત્રવિશેષઃ ।

(૭૬) પ્રસ્તરભેદિવૃક્ષસ્ય વલ્કલં માહેન્દ્રપર્વતારણ્યે ઉપલબ્ધં ઇતિ ।

(૭૭) યથાવિહિત લક્ષણાનુપાતેન ઇતિ ભદ્રોપાયઃ ।

(૭૮) ગ્રન્થિરેખા વલિઃ પર્વાણ્યઙ્ગરાગં યથોચિતમ્ । પ્રકૃત્યાનુસૃતેઃ કુર્યાત્તદઙ્ગસૌભગં સ્મૃતમ્ । શિલ્પાગમે તૃતીયાધ્યાયે ૧૪ શ્લોકે ઉક્તમ્ ।

(૭૯) ધ્યાનાનુસૃતં યદ્રૂપં તદ્રૂપો ધ્યાનવિગ્રહઃ, શિલ્પરત્નકોશે ૪૫૫ તમે શ્લોકે ।

(૮૦) કામસ્તદગ્રે સમવર્ત્તતાધિ મનસો રેતઃ પ્રથમં યદાસીત્ । ઇતિ નાસદીયે ।

(૮૧) શિલાયા અપૃથક્ સંલગ્નરૂપેણ સર્વાઙ્ગં યત્ર સુષમં તદર્ધાકલમ્ ।

(૮૨) સદા યૌવનસમ્પન્નં પેશિગ્રન્થિવિવર્જિતમ્ । દૈવલક્ષણસંયુક્તં રૂપં સુષમમુચ્યતે । શિલ્પાગમે ।

(૮૩) તથા અઙ્ગાનિ કેવલ રેખાચુમ્બિત અઙ્ગસ્ય તદ્રેખા અવલમ્બને તદ્ સ્પર્શીતમિતિ ।

(૮૪) જ્યોતિઃ પ્રતીકભાવનાઙ્ગુષ્ઠમ્ ।

(૮૫) તત્ત્વજ્ઞાનેન ચિત્તસ્ય વિક્રિયાઽભાવાવેશેન મનસઃ વિક્રિયા ઇતિ । તત્ત્વબોધાત્ ચિત્તં સ્થિરં ભવતિ, ભાવપ્રચોદને મનઃ તત્ત્વબોધે પ્રવિલીયતે, વિસર્ગ ઇવ દ્વયોઃ એકા ગતિઃ, અતો દ્વિધા એકત્વમિતિ પરિણામઃ ।

(૮૬) યૂપસ્ય ધ્વજમાનાર્થં ત્રિવૃતકરણધ્યેયં મધ્યનિર્ધારણાર્થં ચ નિમ્નોર્ધ્વે લઘુભાગસ્ય માનસમ્પ્રાપ્ત્યર્થમિદં માનમિતિ ભાવઃ ।

(૮૭) વિંશો હિ પુરુષો દશ દ્વાદશાઙ્ગુલ્યો દશ યો હ્યા ઇતિ શતપથે ઉક્તમ્ । દશેન્દ્રિયસ્યાધારઃ પુરુષ ઇત્યર્થઃ । યથા પુરુષે દશાઙ્ગં તથા પિપ્પલાદીયપિતૃમેધેન સ્તમ્ભાકૃતિયૂપે દશાઙ્ગં કલ્પયન્તિ ઋષયઃ ।

(૮૮) અષ્ટારયૂપદેવતા પ્રતિષ્ઠાયાં વાસ્તુકર્મણિ પ્રયોજનં ભવતિ । ષોડશાર યૂપ વિષ્ણુમહાયજ્ઞે પ્રયોજનં ભવતિ । વૃષસ્તમ્ભો મૃતાહે પિતૃયજ્ઞે વૃષોત્સર્ગે પ્રયોજનમિથુનસ્તમ્ભસ્ય પ્રચલનં નાસ્તિ । (ઉત્કલભાષાયામ્) પ્રથમ દ્વિતીય પથરરે કરિબ વૃષસ્તમ્ભં વટ વિલ્વ ઉદુમ્બરરે કરિબ ।

(૮૯) રુદ્ર વૃષરૂપેણ શુક્લયજુર્વેદ ઉક્તં ચ ધર્મવૃષભમિતિ "વૃષ વૈ ધર્મઃ" પૈપ્પલાદસંહિતાયાં ૧ ખણ્ડે "હિરણ્યશૃઙ્ગો વૃષભો ય સમુદ્રાદુદાચરત્" । "સ વૃષ હિ ઇન્દ્ર સખા શતવાલો" ઇતિ અથર્વવેદે ઉક્તમ્ । તદ્વૃષ પિતૃરૂપેણ પિતૃયૂપસ્યાવાસે ઉપાસયન્તિ, પિતૃણાં રુદ્ર, ઇતિ તસ્ય ભાવઃ ।

(૯૦) પઞ્ચ પ્રયાજાઃ દૈવપુજને, આજ્યભાગઃ, પ્રધાનયાગઃ, સ્વિષ્ટકૃત્, પ્રાશિત્રાવદાનમ્, ઇડાવદાનમ્, ભાગપ્રાશનમ્, અન્વાહાર્ય-દક્ષિણા અનુયાજત્રયમ્, બ્યુહનમ્, સૂક્તવાક્, શંયુવાક્, પત્નીસંયાજ ઇતિ દશકર્મભેદે દશયજ્ઞાઙ્ગસંયોગશીર્ષરૂપેણ વિષ્ણુક્રમઃ તસ્ય દશાઙ્ગસ્ય ભાવઃ ।

(૯૧) પ્રત્યક્ષદર્શનં સમ્ભવતિ ।

(૯૨) બ્રહ્મકીલ ઇતિ મધ્યરેખા ।

(૯૩) અષ્ટકાશ્રાદ્ધે ઇન્દ્રઃ વિશ્વેદેવાઃ પ્રજાપતિઃ, સપ્તપુરુષાર્થઃ પિપ્પલાદીયબ્રાહ્મણાઃ ।

(૯૪) યથા મનુષ્યગર્ભાન્તરે ભ્રૂણે કૃમિ -મજ્જા-અસ્થિ-માંસ-મેદ-સ્નાયુ-રક્ત-કેશાત્મક-શિરાછન્દે-ચર્માદિ દશાસ્તરણયુક્તં દશકોષ્ઠકં કલ્પયન્તિ શિશુવેદોપનિષદિ આથર્વણીયાઃ ।

(૯૫) યથા શતપથે સ્વર્ણપુરુષરૂપેણ પ્રજાપતિરૂપં કલ્પયન્તિ હોતારઃ ષષ્ઠાધ્યાયે ઉક્તમ્ ।

(૯૬) મહર્ષિકાત્યાયનસ્ય શુલ્વં ભગવતઃ પિપ્પલાદસ્ય શિલ્પસૂત્રમિતિ ।

(૯૭) રેખાકૃતિરિષ્ટકાન્યાસ ઇતિ શ્રોણિઃ । જ્યોતિષ્ટોમે મહાવેધાઃ, શ્રોણિરિત્યાદિ ।

(૯૮) અત્ર ભયઙ્કરે અદ્ભુતભાવો વિલીયતે । શિલ્પે અદ્ભુતભાવઃ ઊહનીયઃ ।

(૯૯) યદ્ પ્રદર્શયન્તિ તનુષિ તદ્ભાવઃ યદીક્ષણેન હૃદયે સઞ્ચારયન્તિ સ રસઃ ।

(૧૦૦) તર્દઃ (ખર્વત) અથર્વ૦ ૬.૫૦.૧ ઉક્તઃ, અન્નહાનિકરઃ પતઙ્ગવિશેષઃ ।

(૧૦૧) ચતુર્દશસઙ્ખ્યક ઇત્યર્થઃ ।

(૧૦૨) વાગ્ વૈ મન્ત્રઃ શતપથબ્રાહ્મણે ઉક્તમ્ । વાક્યેન સહ યદ્ પ્રકટયન્તિ ।

(૧૦૩) યથા અથર્વસંહિતાયાં લક્ષણમ્, ૬.૧૪૧.૩- સહસ્રપોષાય કૃણુતં લક્ષ્માશ્વિના । ઇતિ ।

(૧૦૪) રૂપં રૂપં વયો વયઃ સંરભ્યૈનં પરિષ્વજે ઇત્યુક્તં અથર્વ ૧૯.૧.૩.તતઃ વિષ્ણુરૂપં, યદસ્તિ વચનેઽપ્યુક્તમ્, પૈપ્પલાદસંહિતાયાં સ્ત્રીણાં પ્રતિરૂપમુપાસકા તદર્થં પ્રતિરૂપાણિ ।

(૧૦૫) દેવતાયતનમિતિ, તાનિ ન કમ્પન્તે, દૈવતપ્રતિમા હસન્તિ રુદન્તિ નૃત્યન્તિ સ્ફુટન્તિ સીદન્તિ, ઉન્મીલન્તિ નિમીલન્તિ, શતપથબ્રાહ્મણે ૭.૧૦.ઉક્તમ્ । ઐતરેય બ્રાહ્મણે ૪.૫ રૂપવિદ્યા છન્દોમય દૈવશિલ્પમ્, રૂપેણ ઉક્તમ્ । તથા શતપથબ્રાહ્મણે ૩.૨ પ્રતિરૂપશિલ્પરૂપેણ ઉક્તમ્ । રૂપં વૈ અર્ચ્ચારૂપં, પ્રતિરૂપાણિ ઉપદેવતાનિ, અન્યા મણ્ડનમિતિ ।

(૧૦૬) યથા જૈમિનીયબ્રાહ્મણે (૨.૪) ઉક્તં દિશ ઉ એવં વિશ્વદેવાઃ દિશો વૈ પ્રાણઃ ઇતિ વાક્યમ્ ।

(૧૦૭) અહલ્લિકા ભાટ ઇત્યર્થઃ કુન્તાપીય રમણીવિશેષઃ ।

(૧૦૮) તારાદિ દેવતાઃ । દ્યૌશ્ચ મ ઇદં પૃથિવી ચ પ્રચેતસૌ શુક્રો બૃહન્ દક્ષિણયા પિપર્તુ । અથર્વ૦ ૬.૫૩.૧ સૂર્ય ઇત્યર્થઃ ।

(૧૦૯) આશાનામાશાપાલેભ્યશ્ચતુર્ભ્યો અમૃતેભ્યઃ । અથર્વવેદે ૧.૩૧.૧।

(૧૧૦) વિષ્ણુયાજકાઃ । પુરુષો હ નારાયણોઽકામયત । યો વૈષ્ણવો વામનઃ, શતપથે ઉક્તમ્ ।

(૧૧૧) યથા જ્યોતિષ્યેવં રૂપં દધાતીતિ શતપથે ઉક્તમ્ ।

(૧૧૨) યથા પાકયજ્ઞે ઔપાસને ચ પ્રજાપતિઃ, સ્વીષ્ટકૃત્ અઙ્ગદેવતા પ્રાતઃ સૂર્યઃ પ્રધાનો ભવતિ તથા વિશ્વદેવાર્થં દેવયજ્ઞઃ ।

(૧૧૩) ષોડશકલં વૈ બ્રહ્મ શતપથબ્રાહ્મણે ઉક્તમ્ । "ષોડશર્ચેભ્યઃ સ્વાહા" ઇતિ ષોડશકલા ઉક્તાઃ । અથર્વ ૧૯.૨૩.૧૩।

(૧૧૪) યદઙ્ગં ચરતિ ધરાયામ્ ।

(૧૧૫) નાભૌ જીવસત્તા રાજતે પ્રસરતિ ચ ।

(૧૧૬) હૃદયે પ્રાણસ્તિષ્ઠતિ ।

(૧૧૭) બ્રહ્મરન્ધ્રે તેજો વિભાતિ, આવિર્ભવતિ ।

(૧૧૮) તત્તારકં દ્વિવિધં, મૂર્તિતારકમમૂર્તિતારકઞ્ચેતિ । યદિન્દ્રિયાન્તં તન્મૂર્તિમત્, યદ્ ભ્રૂયુગાતીતં તદમૂર્તિમત્ ઇતિ અદ્વયતારકે ઉક્તમ્ ।

(૧૧૯) સર્વાન્તરઃ સ્વયઞ્જ્યોતિઃ સર્વાધિપતિરસ્મ્યહં ઇતિ સ્વરાટ્ યોગતત્ત્વોપનિષદિ ઉક્તમ્ ।

(૧૨૦) હિરણ્મયે પરે કોષે વિરજં બ્રહ્મ નિષ્કલમિતિ ન્યાયેન ।

(૧૨૧) યથા નારદપરિવ્રાજકોપનિષદિ ઉક્તમ્-ચક્ષુષા રૂપગ્રહણં શ્રોત્રે શબ્દગ્રહણમિત્યાદિ । અથર્વવેદે-રૂપં રૂપં વયોવય ઇત્યાદ્યુક્તમ્ ।

(૧૨૨) તદ્ વૈ બ્રહ્મણો રૂપેઽમૃતત્વં ચૈવામૃતં ચ શતપથબ્રાહ્મણે ઉક્તમ્ ।

(૧૨૩) કૌષીતકિબ્રાહ્મણે કલાવિધેત્યુક્તમ્ । પિપ્પલાદસહિન્તાયાં ૧ ઉક્તમ્ ।

(૧૨૪) અથર્વવેદે (૬.૧૩૩.૨) મેખલાબન્ધનપ્રસઙ્ગે ઉક્તમ્-આહુતાસ્યભિહુત ઋષીણામસ્યાયુધં ઇતિ । પરામિત્રાન્દુન્દુભિના હરિણસ્યાજિનેન ચ । સર્વે દેવા અતિત્રસન્ચે સઙ્ગ્રામસ્યેશતે । અથર્વ૦ ૫.૨૧.૭

(૧૨૫) આથર્વણીયે આસુરીકલ્પે બીજમન્ત્રસ્ય પ્રયોગ ઉક્તઃ ।

(૧૨૬) વાગ્ વૈ મન્ત્ર ઇતિ શતપથે ઉક્તમ્ । વાગ્ વૈ દેવાનાં મન્ત્ર ઇતિ કૌષીતકીયે ઉક્તમ્ ।

(૧૨૭) સંહારણ વં ઇતિ પૂર્વપાઠશબ્દસ્ય શક્તિરિત્યર્થઃ ।

(૧૨૮) કમ્પનમિત્યર્થઃ ।

(૧૨૯) પ્રજ્ઞા ઇત્યર્થઃ ।

(૧૩૦) દણ્ડાયમાન મૂર્તિરિત્યર્થઃ ।

(૧૩૧) ઐતરેયે યથોક્તવાહનરૂપસ્ય રૂપવિશેષઃ ।

(૧૩૨) શતપથે છાન્દોગ્યે ચોક્તઃ એષ ક્રમઃ એષા દેવયજનવિદ્યા । આત્માનન્દેન યજનોપાયેન ત્રયસ્ત્રિંશદ્ દેવતાઃ તાર્ક્ષ્યે બ્રાહ્મણે ઉક્તાઃ ।

(૧૩૩) વૃદ્ધિ જાલં બૃહતઃ શક્રસ્ય વાજિનીવત ઇતિ અથર્વ ૮.૮.૬।

(૧૩૪) પ્રાણો વૈ મહિષ ઇતિ શતપથે ઉક્તમ્ ।

(૧૩૫) મેષ ઇવ વૈ સં ચ વિ ચોર્વચ્યસે ઇતિ । અથર્વ ૬.૪૯.૨।

(૧૩૬) સૂર્યસ્ય વા એક રશ્મિર્વૃષ્ટિદ ઇતિ શતપથે ઉક્તમ્ । સ સવિતા રથેનેતિ ।

(૧૩૭) વૃષભોઽસિ સ્વર્ગ ઋષીનાર્ષેયાન્ ગચ્છ ઇતિ । અથર્વ ૧૧.૧.૩૫।

(૧૩૮) હંસેતિ શબ્દાર્થઃ સર્વેષુ દેહેષુ વ્યાપ્તો વર્તતે ઇતિ હંસોપનિષદિ ઉક્તમ્ ।

(૧૩૯) દ્વા સુપર્ણા સયુજા સખાયા સમાનં વૃક્ષં પરિષસ્વજાતે ઇતિ । ઋ ૧.૧૬૪.૨૦; અથર્વ ૯.૯.૨૦।

(૧૪૦) એના વ્યાઘ્રં પરિષસ્વજાનાઃ સિંહં હિન્વન્તિ મહતે સૌભગાય ઇતિ । અથર્વ ૪.૮.૭।

(૧૪૧) વાસ્તુવેદે ઇદમુપદૈવતં પ્રતિરૂપમિત્યર્થઃ । પ્રતિરૂપં શતપથબ્રાહ્મણે એકાદશકાણ્ડે ઉક્તમ્ । તેષાં ચર્ચા જૈમિનીયબ્રાહ્મણે -પ્રત્યઙ્ગં હ્યેષ સર્વાણિ રૂપાણિ ય આદિત્યઃ સ પ્રતિરૂપમિત્યુક્તઃ ।

(૧૪૨) વૈશ્વાનરો વૈ સર્વેઽગ્નય ઇતિ શતપથે ઉક્તમ્ ।

(૧૪૩) અસૌ વૈશ્વાનરો યોઽસૌ તપતિ (પચતિ) ઇતિ શતપથે ।

(૧૪૪) પુરુષે યેનેદમન્નં પચ્યતે ઇતિ શતપથે ઉક્તમ્ ।

(૧૪૫) સેન્દ્રસ્ય પત્નીતિ ગોભિલગૃહ્યસૂત્રે ઉક્તમ્ ।

(૧૪૬) જીવસ્યાઽવયવાત્મિકા ।

(૧૪૭) અગ્નિર્વૈ મૃત્યુરિતિ કૌષીતકિ બ્રાહ્મણે, મૃત્યુર્વૈ તસ્ય શતપથે ચ ।

(૧૪૮) ઐતરેયે વારુણી રાત્રિરિતિ ઉક્તમ્ ।

(૧૪૯) ઇલા વૈ અન્નમિતિ અથર્વવેદે ઉક્તમ્ ।

(૧૫૦) તમશ્છાયા ।

(૧૫૧) ઉષા દેવી વાચા સંવિદાના વાગ્દેવ્યુષસા સંવિદાના ઇતિ અથર્વવેદે ઉક્તમ્ ।

(૧૫૨) દ્યૌરિત્યર્થઃ । ભૂતભવિષ્યદભીષ્ટવીર્યા લક્ષ્મીર્વલમિતિ અથર્વવેદે ઉક્તમ્ ।

(૧૫૩) સેયં દેવાનાં પત્નીતિ શતપથે ઉક્તમ્ ।

(૧૫૪) તેજસા વૈ ગાયત્રી પ્રથમમિતિ તાણ્ડ્યબ્રાહ્મણે ।

(૧૫૫) વાક્ સાવિત્રીતિ ગોપથબ્રાહ્મણે ઉક્તમ્ ।

(૧૫૬) સારસ્વતરૂપં ઐતરેયે ઉક્તમ્ ।

(૧૫૭) સવિતા રાષ્ટ્રં રાષ્ટ્રપતિરિતિ શતપથે ચ ૧૧.૪.૩.૧૪।

(૧૫૮) અમ્બા અથર્વવેદે ઉક્તા ।

(૧૫૯) ભેષજરૂપા અમ્બાલિકેતિ વાજસનેયે ઉક્તા ।

(૧૬૦) "દેવાઃ પિતરઃ પિતરો દેવા । યો અસ્મિ સો અસ્મિ," અથર્વ ૬.૧૨૩.૩ કાણ્ડે । સ વિશ્વેદેવા તથા પિતર ઉપદેવા વસુપિતર રુદ્રપિતામહ આદિત્ય પ્રપિતામહ ઇતિ પિતૃયૂપ પ્રોત્થનમન્ત્રાણિ ૨૪ સૂક્તોક્તં ચ ।

(૧૬૧) મુઞ્ચતાંહસોઅંહસ ઇતિ વદન્તિ । અથર્વ । ૩૧.૨.યે દક્ષિણતો જુહૂતિ જાતવેદો દક્ષિણાયા દિશોઽભિદાસન્ત્યસ્માન્ ઇતિ ત્યાગઃ । અથર્વ ૪.૪૦.૨.ઇન્દ્રાસોમા તપતં રક્ષ ઇતિ વદન્તિ । અથર્વ ૮.૪.૧.વિષેણ ભઙ્ગુરાવતઃ પ્રતિ સ્મ રક્ષસો જહિ ઇતિ ભોગઃ અથર્વ ૮.૩.૨૩ ।

(૧૬૨) સ્વાહા વૈ સત્યસમ્ભૂતા બ્રહ્મણો દુહિતેતિ । શતપથે ઉક્તમ્ ।

(૧૬૩) એતેન વિષ્ણોઃ શ્રીદેવી ભૂદેવીતિ વૃત્તિદ્વયં સૂચિતમ્ ।

(૧૬૪) સરસ્વતીં દેવયન્તો હવન્તે સરસ્વતીમધ્વરે તાયમાને । સરસ્વતીં સુકૃતો હવન્તે સરસ્વતી દાશુષે વાર્યં દાત્ ॥ અથર્વ ૧૮.૪.૪૫।

(૧૬૫) લૌકિક સિદ્ધ્યર્થે યા વિદ્યા સા ભૂતવિદ્યા ।

(૧૬૬) મન ઇવ હિ પ્રજાપતિઃ તૈત્તિરીયબ્રાહ્મણે ઉક્તમ્ । (૨.૨.૧.૨)

(૧૬૭) પ્રાણો વૈ હરિઃ સ હિ હરતીતિ । કૌષીતકિબ્રાહ્મણં (૧૭.૧) ।

(૧૬૮) યદ્ધામં ચક્રુર્નિખનન્તો અગ્રે કાર્ષીવણા અન્નવિદો ન વિદ્યયા । (અથર્વ ૬.૧૧૬.૧) ।

(૧૬૯) ગોભિલગૃહ્યસૂત્રે ઉક્તમ્ ।

(૧૭૦) શિમિ-કર્મ, તજ્જાતાઃ ।

(૧૭૧) સ્તોતૃયોવચ શ◌ૃણુ વદ્ધ ચ મે ઇતિ અથર્વસંહિતાયામ્ ।

(૧૭૨) કુન્તાપસૂક્તાદયઃ ખિલપાઠાઃ । યથા શુનઃ શેષસ્ય શતગાથા ઇતિ ।

(૧૭૩) યોષિત્કામા ગન્ધર્વા ગન્ધેન વૈ રૂપેણ ચરન્તીતિ શતપથે ઉક્તમ્ ।

Footnotes are assembled together and marked
with number in parenthesis in the text.

Proofread and rearranged by K.S. Sheshadri

*vAstusUtropaniShat savyAkhyA commentary*
pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*